# upadeshasAhasrI

# ઉપદેશસાહસ્રી

## Document Information

Text title : upadesha sAhasrI: A Thousand Teachings

File name : US_itran_new.itx

Category : sahasranAma, shankarAchArya

Location : doc_z_misc_shankara

Author : Shankaracharya

Transliterated by : David J. Dargie and Michelle M. Styles-Dargie

Proofread by : David J. Dargie <dargie at cltr.uq.edu.au>

Latest update : January 26, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

upadeshasAhasrI

# ઉપદેશસાહસ્રી

(Metrical Section)

US-P01.001ab ચૈતન્યં સર્વગં સર્વં સર્વભૂતગુહાશયમ્ ।
US-P01.001cd યત્ સર્વવિષયાતીતં તસ્મૈ સર્વવિદે નમઃ ॥

US-P01.002ab સમાપય્ય ક્રિયાઃ સર્વા દારાગ્ન્યાધાનપૂર્વિકાઃ ।
US-P01.002cd બ્રહ્મવિદ્યામથેદાનીં વક્તું વેદઃ પ્રચક્રમે ॥

US-P01.003ab કર્માણિ દેહયોગાર્થં દેહયોગે પ્રિયાપ્રિયે ।
US-P01.003cd ધ્રુવે સ્યાતાં તતો રાગો દ્વેષશ્ચૈવ તતઃ ક્રિયાઃ ॥

US-P01.004ab ધર્માધાર્મૌ તતોઽજ્ઞાસ્ય દેહયોગસ્તથા પુનઃ ।
US-P01.004cd એવં નિત્યપ્રવૃત્તોઽયં સંસારશ્ચક્રવદ્ ભૃશમ્ ॥

US-P01.005ab અજ્ઞાનં તસ્ય મૂલં સ્યાદિતિ તદ્ધાનમિષ્યતે ।
US-P01.005cd બ્રહ્મવિદ્યાત આરબ્ધા તતો નિઃશ્રેયસં ભવેત્ ॥

US-P01.006ab વિદ્યૈવાજ્ઞાનહાનાય ન કર્માપ્રતિકૂલતઃ ।
US-P01.006cd નાજ્ઞાનસ્યાપ્રહાણે હિ રાગદ્વેષક્ષયો ભવેત્ ॥

US-P01.007ab રાગદ્વેષક્ષયાભાવે કર્મ દોષદ્ભવં ધ્રુવમ્ ।
US-P01.007cd તસ્માન્ નિઃશ્રેયસાર્થાય વિદ્યૈવાત્ર વિધીયતે ॥

US-P01.008ab નનુ કર્મ તથા નિત્યં કર્તવ્યં જીવને સતિ ।
US-P01.008cd વિદ્યાયાઃ સહકારિત્વં મોક્ષં પ્રતિ હિ તદ્ વ્રજેત્ ॥

US-P01.009ab યથા વિદ્યા તથા કર્મ ચોદિતત્વાવિશેષતઃ ।
US-P01.009cd પ્રત્યવાયસ્મૃતેશ્ચૈવ કાર્યં કર્મ મુમુક્ષુભિઃ ॥

US-P01.010ab નનુ ધ્રુવફલા વિદ્યા નાન્યત્ કિંચિદપેક્ષતે ।
US-P01.010cd નાગ્નિષ્ટોમો યથૈવાન્યદ્ ધ્રુવકાર્યોઽપ્યપેક્ષતે ॥

US-P01.011ab તથા ધ્રુવફલા વિદ્યા કર્મ નિત્યમપેક્ષતે ।

US-P01.011cd ઇત્યેવં કેચિદિચ્છન્તિ ન કર્મ પ્રતિકૂલતઃ ॥

US-P01.012ab વિદ્યાયાઃ પ્રતિકૂલં હિ કર્મ સ્યાત્ સાભિમાનતઃ ।
US-P01.012cd નિર્વિકારાત્મબુદ્ધિશ્ચ વિદ્યેતીહ પ્રકીર્તિતા ॥

US-P01.013ab અહં કર્તા મમેદં સ્યાદિતિ કર્મ પ્રવર્તતે ।
US-P01.013cd વસ્ત્વધીના ભવેદ્ વિદ્યા કર્તધીનો ભવેદ્ વિધિઃ ॥

US-P01.014ab કારકાણ્યુપમૃદ્નાતિ વિદ્યાઽબ્બુદ્ધિમિવોષરે ।
US-P01.014cd તત્સત્યમતિમાદાય કર્મ કર્તું વ્યવસ્યતિ ॥

US-P01.015ab વિરુદ્ધત્વાદતઃ શક્યં કર્મ કર્તું ન વિદ્યયા ।
US-P01.015cd સહૈવં વિદુષા તસ્માત્ કર્મ હેયં મુમુક્ષુના ॥

US-P01.016ab દેહાદ્યૈરવિશેષેણ દેહિનો ગ્રહણં નિજમ્ ।
US-P01.016cd પ્રાણિનાં તદવિદ્યોત્થં તાવત્ કર્મવિધિર્ભવેત્ ॥

US-P01.017ab નેતિ નેતીતિ દેહાદીનપોહ્યાત્માવશેષિતઃ ।
US-P01.017cd અવિશેષાત્મબોધાર્થં તેનાવિદ્યા નિવર્તિતા ॥

US-P01.018ab નિવૃત્તા સા કથં ભૂયઃ પ્રસૂયેત પ્રમાણતઃ ।
US-P01.018cd અસત્યેવાવિશેષે હિ પ્રત્યગાત્મનિ કેવલે ॥

US-P01.019ab ન ચેદ્ ભૂયઃ પ્રસૂયેત કર્તા ભોક્તેતિ ધીઃ કથમ્ ।
US-P01.019cd સદસ્મીતિ ચ વિજ્ઞાને તસ્માદ્ વિદ્યાસહાયિકા ॥

US-P01.020ab અત્યરેચયદિત્યુક્તો ન્યાસઃ શ્રુત્યાત એવ હિ ।
US-P01.020cd કર્મભ્યો માનસાન્તેભ્ય એતાવદિતિ વાજિનામ્ ॥

US-P01.021ab અમૃતત્વં શ્રુતં તસ્માત્ ત્યાજ્યં કર્મ મુમુક્ષુભિઃ ।
US-P01.021cd અગ્નિષ્ટોમવદિત્યુક્તં તત્રેદમભિધીયતે ॥

US-P01.022ab નૈકકારકસાધ્યત્વાત્ ફલાન્યત્વાચ્ ચ કર્મણઃ ।
US-P01.022cd વિદ્યા તદ્વિપઈતાતો દૃષ્ટાન્તો વિષમો ભવેત્ ॥

US-P01.023ab કૃષ્યાદિવત્ ફલાર્થત્વાદન્યકર્મોપબૃંહણમ્ ।
US-P01.023cd અગ્નિષ્ટોમસ્ત્વપેક્ષેત વિદ્યાન્યત્ કિમપેક્ષતે ॥

US-P01.024ab પ્રત્યવાયસ્તુ તસ્યૈવ યસ્યાહંકાર ઇષ્યતે ।
US-P01.024cd અહંકારફલાર્થિત્વે વિદ્યેતે નાત્મવેદિનઃ ॥

US-P01.025ab તસ્માદજ્ઞાનહાનાય સંસારવિનિવૃત્તયે ।
US-P01.025cd બ્રહ્મવિદ્યાવિધાનાય પ્રારબ્ધોપનિષત્ ત્વિયમ્ ॥

US-P01.026ab સદેરુપનિપૂર્વસ્ય ક્વિપિ ચોપનિષદ્ ભવેત્ ।
US-P01.026cd મન્દીકરણભાવાચ્ ચ ગર્ભાદેઃ શાતનાત્ તથા ॥

US-P02.001ab પ્રૈષેદ્ધુમશક્યત્વાન્ નેતિ નેતીતિ શેષિતમ્ ।
US-P02.001cd ઇદં નાહમિદં નાહમિત્યદ્ધા પ્રતિપદ્યતે ॥

US-P02.002ab ઇદંધીરિદમાત્મોત્થા વાચારમ્ભગોચરા ।
US-P02.002cd નિષિદ્ધાત્મોદ્ભવત્વાત્ સા ન પુનર્માનતાં વ્રજેત્ ॥

US-P02.003ab પૂર્વબુદ્ધિમબાધિત્વા નોત્તરા જાયતે મતિઃ ।
US-P02.003cd દૃષિરેકઃ સ્વયંસિદ્ધઃ ફલત્વાત્ સ ન બાધ્યતે ॥

US-P02.004ab ઇદંવનમતિક્રમ્ય શોકમોહાદિદૂષિતમ્ ।
US-P02.004cd વનાદ્ ગન્ધારકો યદ્વત્ સ્વમાત્માનં પ્રપદ્યતે ॥

US-P03.001ab ઈશ્વરશ્ચેદનાત્મા સ્યાન્ નાસાવસ્મીતિ ધારયેત્ ।
US-P03.001cd આત્મા ચેદીશ્વરોઽસ્મીતિ વિદ્યા સાન્યનિવર્તિકા ॥

US-P03.002ab આત્મનોઽન્યસ્ય ચેદ્ ધર્મા અસ્થૂલત્વાદયો મતાઃ ।
US-P03.002cd અજ્ઞેયત્વેઽસ્ય કિં તૈઃ સ્યાદાત્મત્વે ત્વન્યધીહ્નુતિઃ ॥

US-P03.003ab મિથ્યાધ્યાસનિષેધાર્થં તતોઽસ્થૂલાદિ ગૃહ્યતામ્ ।
US-P03.003cd પરત્ર ચેન્ નિષેધાર્થં શૂન્યતાવરણં હિ તત્ ॥

US-P03.004ab બુભુત્સોર્યદિ ચાન્યત્ર પ્રત્યગાત્મન ઇષ્યતે ।
US-P03.004cd અપ્રાણો હ્યમનાઃ શુભ્ર ઇતિ ચાનર્થકં વચઃ ॥

US-P04.001ab અહંપ્રત્યયબીજં યદહંપ્રત્યયવત્સ્થિતમ્ ।
US-P04.001cd નાહંપ્રત્યયવહ્ન્યુષ્ટં કથં કર્મ પ્રરોહતિ ॥

US-P04.002ab દૃષ્ટવચ્ ચેત્ પ્રરોહઃ સ્યાન્ નાન્યકર્મા સ ઇષ્યતે ।
US-P04.002cd તન્નિરોધે કથં તત્ સ્યાત્ પૃચ્છામો વસ્તદુચ્યતામ્ ॥

US-P04.003ab દેહાદ્યારમ્ભસામર્થ્યાજ્ જ્ઞાનં સદ્વિષયં ત્વયિ ।
US-P04.003cd અભિભૂય ફલં કુર્યાત્ કર્માન્તે જ્ઞાનમુદ્ભવેત્ ॥

US-P04.004ab આરબ્ધસ્ય ફલે હ્યેતે ભોગો જ્ઞાનં ચ કર્મણઃ ।
US-P04.004cd અવિરોધસ્તયોર્યુક્તો વૈધર્મ્યં ચેતરસ્ય તુ ॥

US-P04.005ab દેહાત્મજ્ઞાનવજ્ જ્ઞાનં દેહાત્મજ્ઞાનબાધકમ્ ।
US-P04.005cd આત્મન્યેવ ભવેદ્ યસ્ય સ નેચ્છન્નપિ મુચ્યતે ॥

US-P05.001ab મૂત્રાશઙ્કો યથોદઙ્કો નાગ્રહીદમૃતં મુનિઃ ।
US-P05.001cd કર્મનાશભયાજ્ જન્તોરાત્મજ્ઞાનાગ્રહસ્તથા ॥

US-P05.002ab બુદ્ધિસ્થશ્ચલતીવાત્મા ધ્યાયતીવ ચ દૃશ્યતે ।
US-P05.002cd નૌગતસ્ય યથા વૃક્ષાસ્તદ્વત્ સંસારવિભ્રમઃ ॥

US-P05.003ab નૌસ્થસ્ય પ્રાતિલોમ્યેન નગાનાં ગમનં યથા ।
US-P05.003cd આત્મનઃ સંસૃતિસ્તદ્વદ્ ધ્યાયતીવેતિ હિ શ્રુતિઃ ॥

US-P05.004ab ચૈતન્યપ્રતિબિમ્બેન વ્યાપ્તો બોધો હિ જાયતે ।
US-P05.004cd બુદ્ધેઃ શબ્દાદિનિર્ભાસસ્તેન મોમુહ્યતે જગત્ ॥

US-P05.005ab ચૈતન્યાભાસતાહમસ્તાદર્થ્યં ચ તદસ્ય યત્ ।
US-P05.005cd ઇદમંશપ્રહાણે ન પરઃ સોઽનુભવો ભવેત્ ॥

US-P06.001ab છિત્ત્વા ત્યક્તેન હસ્તેન સ્વયં નાત્મા વિશેષ્યતે ।
US-P06.001cd તથા શિષ્ટેન સર્વેણ યેન યેન વિશેષ્યતે ॥

US-P06.002ab તસ્માત્ ત્યક્તેન હસ્તેન તુલ્યં સર્વં વિશેષણમ્ ।
US-P06.002cd અનાત્મત્વેન તસ્માજ્ જ્ઞો મુક્તઃ સર્વવિશેષણૈઃ ॥

US-P06.003ab વિશેષણમિદં સર્વં જ્ઞાત આત્મન્યસદ્ ભવેત્ ।
US-P06.003cd અવિદ્યાસ્તમતઃ સર્વં જ્ઞાત આત્મન્યસદ્ ભવેત્ ॥

US-P06.004ab જ્ઞાતૈવાત્મા સદા ગ્રાહ્યો જ્ઞેયમુત્સૃજ્ય કેવલઃ ।
US-P06.004cd અહમિત્યપિ યદ્ ગ્રાહ્યં વ્યપેતાઙ્ગસમં હિ તત્ ॥

US-P06.005ab યાવાન્ સ્યાદિદમંશો યઃ સ સ્વતોઽન્યો વિશેષણમ્ ।
US-P06.005cd વિશેષપ્રક્ષયો યત્ર સિદ્ધો જ્ઞશ્ચિત્રગુર્યથા ॥

US-P06.006ab ઇદમંશોઽહમિત્યત્ર ત્યાજ્યો નાત્મેતિ પણ્ડિતૈઃ ।
US-P06.006cd અહં બ્રહ્મેતિ શિષ્ટોઽંશો ભૂતપૂર્વગતેર્ભવેત્ ॥

US-P07.001ab બુદ્ધ્યારૂઢં સદા સર્વં દૃશ્યતે યત્ર તત્ર વા ।
US-P07.001cd મયા તસ્માત્ પરં બ્રહ્મ સર્વજ્ઞશ્ચાસ્મિ સર્વગઃ ॥

US-P07.002ab યથાત્મબુદ્ધિચારાણાં સાક્ષી તદ્વત્ પરેષ્વપિ ।

US-P07.002cd નૈવાપોઢું ન વાદાતું શક્યસ્તસ્માત્ પરો હ્યહમ્ ॥

US-P07.003ab વિકારિત્વમશુદ્ધત્વં ભૌતિકત્વં ન ચાત્મનઃ ।
US-P07.003cd અશેષબુદ્ધિસાક્ષિત્વાદ્ બુદ્ધિવચ્ ચાલ્પવેદના ॥

US-P07.004ab મણૌ પ્રકાશ્યતે યદ્વદ્ રક્તાદ્યાકારતાતપે ।
US-P07.004cd મયિ સંદૃશ્યતે સર્વમાતપેનેવ તન્ મયા ॥

US-P07.005ab બુદ્ધૌ દૃશ્યં ભવેદ્ બુદ્ધૌ સત્યાં નાસ્તિ વિપર્યયે ।
US-P07.005cd દ્રષ્ટા યસ્માત્ સદા દ્રષ્ટા તસ્માદ્ દ્વૈતં ન વિદ્યતે ॥

US-P07.006ab અવિવેકાત્ પરાભાવં યથા બુદ્ધિરવેત્ તથા ।
US-P07.006cd વિવેકાત્ તુ પરાદન્યઃ સ્વયં ચાપિ ન વિદ્યતે ॥

US-P08.001ab ચિતિસ્વરૂપં સ્વત એવ મે મતે રસાદિયોગસ્તવ મોહકારિતઃ ।
US-P08.001cd અતો ન કિંચિત્ તવ ચેષ્ટિતેન મે ફલં ભવેત્ સર્વવિશેષહાનતઃ ॥

US-P08.002ab વિમુચ્ય માયામયકાર્યતામિહ પ્રશાન્તિમાયાહ્યસદીહિતાત્ સદા ।
US-P08.002cd અહં પરં બ્રહ્મ સદા વિમુક્તવત્ તથાજમેકં દ્વયવર્જિતં યતઃ ॥

US-P08.003ab સદા ચ ભૂતેષુ સમોઽસ્મિ કેવલો યથા ચ ખં સર્વગમક્ષરં શિવમ્ ।
US-P08.003cd નિરન્તરં નિષ્કલમક્રિયં પરં તતો ન મેઽસ્તીહ ફલં તવેહિતૈઃ ॥

US-P08.004ab અહં મમૈકો ન તદન્યદિષ્યતે તથા ન કસ્યાપ્યહમસ્મ્યસઙ્ગતઃ ।
US-P08.004cd અસઙ્ગરૂપોઽહમતો ન મે ત્વયા કૃતેન કાર્યં તવ ચાદ્વયત્વતઃ ॥

US-P08.005ab ફલે ચ હેતૌ ચ જનો વિષક્તવાનિતિ પ્રચિન્ત્યાહમતો વિમોક્ષણે ।
US-P08.005cd જનસ્ય સંવાદમિમં પ્રકલ્પવાન્ સ્વરૂપતત્ત્વાર્થવિબોધકારણમ્ ॥

US-P08.006ab સંવાદમેતં યદિ ચિન્તયેન્ નરો વિમુચ્યતેઽજ્ઞાનમહાભયાગમાત્ ।
US-P08.006cd વિમુક્તકામશ્ચ તથા જનઃ સદા ચરત્યશોકઃ સમ આત્મવિત્ સુખી ॥

US-P09.001ab સૂક્ષ્મતાવ્યાપિતે જ્ઞેયે ગન્ધાદેરુત્તરોત્તરમ્ ।
US-P09.001cd પ્રત્યગાત્માવસાનેષુ પૂર્વપૂર્વપ્રહાણતઃ ॥

US-P09.002ab શારીરા પૃથિવી તાવદ્ યાવદ્ બાહ્યા પ્રમાણતઃ ।
US-P09.002cd અબાદીનિ ચ તત્ત્વાનિ તાવજ્ જ્ઞેયાનિ કૃત્સ્નશઃ ॥

US-P09.003ab વાય્વાદીનાં યથોત્પત્તેઃ પૂર્વં ખં સર્વગં તથા ।
US-P09.003cd અહમેકઃ સદા સર્વશ્ચિન્માત્રઃ સર્વગોઽદ્વયઃ ॥

US-P09.004ab બ્રહ્માદ્યાઃ સ્થાવરાન્તા યે પ્રાણિનો મમ પૂઃ સ્મૃતાઃ ।
US-P09.004cd કામક્રોધાદયો દોષા જાયેરન્ મે કુતોઽન્યતઃ ॥

US-P09.005ab ભૂતદોષૈઃ સદાસ્પૃષ્ટં સર્વભૂતસ્થમીશ્વરમ્ ।
US-P09.005cd નીલં વ્યોમ યથા બાલો દૂષ્ટં માં વીક્ષતે જનઃ ॥

US-P09.006ab મચ્ચૈતન્યાવભાસ્યત્વાત્ સર્વપ્રાણિધિયાં સદા ।
US-P09.006cd પૂર્મમ પ્રાણિનઃ સર્વે સર્વજ્ઞસ્ય વિપાપ્મનઃ ॥

US-P09.007ab જનિમજ્ જ્ઞાનવિજ્ઞેયં સ્વપ્નજ્ઞાનવદિષ્યતે ।
US-P09.007cd નિત્યં નિર્વિષયં જ્ઞાનં તસ્માદ્ દ્વૈતં ન વિદ્યતે ॥

US-P09.008ab જ્ઞાતુર્જ્ઞાતિર્હિ નિત્યોક્તા સુષુપ્તે ત્વન્યશૂન્યતઃ ।
US-P09.008cd જાગ્રજ્જ્ઞાતિસ્ત્વવિદ્યાતસ્તદ્ ગ્રાહ્યં ચાસદિષ્યતામ્ ॥

US-P09.009ab રૂપવત્ત્વાદ્યસત્ત્વાન્ ન દૃષ્ટ્યાદેઃ કર્મતા યથા ।
US-P09.009cd એવં વિજ્ઞાનકર્મત્વં ભૂમ્નો નાસ્તીતિ ગમ્યતે ॥

US-P10.001ab દૃશિસ્વરૂપં ગગનોપમં પરં સકૃદ્વિભાતં ત્વજમેકમક્ષરમ્ ।
US-P10.001cd અલેપકં સર્વગતં યદદ્વયં તદેવ ચાહં સતતં વિમુક્ત ઓમ્ ॥

US-P10.002ab દૃષિસ્તુ શુદ્ધોઽહમવિક્રિયાત્મકો ન મેઽસ્તિ કશ્ચિદ્ વિશયઃ સ્વભાવતઃ ।
US-P10.002cd પુરસ્તિરશ્ચોર્ધ્વમધશ્ચ સર્વતઃ સુપૂર્ણભૂમા ત્વજ આત્મનિ સ્થિતઃ ॥

US-P10.003ab અજોઽમરશ્ચૈવ તથાજરોઽમૃતઃ સ્વયંપ્રભઃ સર્વગતોઽહમદ્વયઃ ।
US-P10.003cd ન કારણં કાર્યમતીવ નિર્મલઃ સદૈવ તૃપ્તશ્ચ તતો વિમુક્ત ઓમ્ ॥

US-P10.004ab સુષુપ્તજાગ્રત્સ્વપતશ્ચ દર્શનં ન મેઽસ્તિ કિંચિત્ સ્વમિવેહ મોહનમ્ ।
US-P10.004cd સ્વતશ્ચ તેષાં પરતોઽપ્યસત્ત્વતસ્તુરીય એવાસ્મિ સદા દૃગદ્વયઃ ॥

US-P10.005ab શરીરબુદ્ધીન્દ્રિયદુઃખસંતતિર્ન મે ન ચાહં મમ નિર્વિકારતઃ ।
US-P10.005cd અસત્ત્વહેતોશ્ચ તથૈવ સંતતેરસત્ત્વમસ્યાઃ સ્વપતો હિ દૃશ્યવત્ ॥

US-P10.006ab ઇદં તુ સત્યં મમ નાસ્તિ વિક્રિયા વિકારહેતુર્ન હિ મેઽદ્વયત્વતઃ ।
US-P10.006cd ન પુણ્યપાપે ન ચ મોક્ષબન્ધને ન ચાસ્તિ વર્ણશ્રમતાશઈરતઃ ॥

US-P10.007ab અનાદિતો નિર્ગુણતો ન કર્મ મે ફલં ચ તસ્માત્ પરમોઽહમદ્વયઃ ।
US-P10.007cd યથા નભઃ સર્વગતં ન લિપ્યતે તથા હ્યહં દેહગતોઽપિ સૂક્ષ્મતઃ ॥

US-P10.008ab સદા ચ ભૂતેષુ સમોઽહમીશ્વરઃ ક્ષરાક્ષરાભ્યાં પરમો હ્યથોત્તમઃ ।
US-P10.008cd પરાત્મતત્ત્વશ્ચ તથાદ્વયોઽપિ સન્ વિપર્યયેણાભિવૃતસ્ત્વવિદ્યયા ॥

US-P10.009ab અવિદ્યયા ભાવનયા ચ કર્મભિર્વિવિક્ત આત્માવ્યવધિઃ સુનિર્મલઃ ।
US-P10.009cd દૃગાદિશક્તિપ્રચિતોઽહમદ્વયઃ સ્થિતઃ સ્વરૂપે ગગનં યથાચલમ્ ॥

US-P10.010ab અહં પરં બ્રહ્મ વિનિશ્ચયાત્મદૃગ્ ન જાયતે ભૂય ઇતિ શ્રુતેર્વચઃ ।
US-P10.010cd ન ચૈવ બીજે ત્વસતિ પ્રજાયતે ફલં ન જન્માસ્તિ તતો હ્યમોહતા ।
US-P10.011ab મમેદમિત્થં ચ તવાદ ઈદૃશં તથાહમેવં ન પરોઽપિ ચાન્યથા ।
US-P10.011cd વિમૂઢતૈવસ્ય જનસ્ય કલ્પના સદા સમે બ્રહ્મણિ ચાદ્વયે શિવે ॥

US-P10.012ab યદદ્વયં જ્ઞાનમતીવ નિર્મલં મહાત્મનાં તત્ર ન શોકમોહતા ।
US-P10.012cd તયોરભાવે ન હિ કર્મ જન્મ વા ભવેદયં વેદવિદાં વિનિશ્ચયઃ ॥

US-P10.013ab સુષુપ્તવજ્ જાગ્રતિ યો ન પશ્યતિ દ્વયં તુ પશ્યન્નપિ ચાદ્વયતઃ ।
US-P10.013cd તથા ચ કુર્વન્નપિ નિષ્ક્રિયશ્ચ યઃ સ આત્મવિન્ નાન્ય ઇતીહ નિશ્ચયઃ ॥

US-P10.014ab ઇતીદમુક્તં પરમાર્થદર્શનં મયા હિ વેદાન્તવિનિશ્ચિતં પરમ્ ।
US-P10.014cd વિમુચ્યતેઽસ્મિન્ યદિ નિશ્ચિતો ભવેન્ ન લિપ્યતે વ્યોમવદેવ કર્મભિઃ ॥

US-P11.001ab ઈક્ષિતૃત્વં સ્વતઃસિદ્ધં જન્તૂનાં ચ તતોઽન્યતા ।
US-P11.001cd અજ્ઞાનાદિત્યતોઽન્યત્વં સદસીતિ નિવર્ત્યતે ॥

US-P11.002ab એતાવદ્ ધ્યમૃતત્વં ન કિંચિદન્યત્ સહાયકમ્ ।
US-P11.002cd જ્ઞાનસ્યેતિ બ્રુવચ્છાસ્ત્રં સલિઙ્ગં કર્મ બાધતે ॥

US-P11.003ab સર્વેષાં મનસો વૃત્તમવિશેષેણ પશ્યતઃ ।
US-P11.003cd તસ્ય મે નિર્વિકારસ્ય વિશેષઃ સ્યાત્ કથંચન ॥

US-P11.004ab મનોવૃત્તં મનશ્ચૈવ સ્વપ્નવજ્ જાગ્રતીક્ષિતુઃ ।
US-P11.004cd સમ્પ્રસાદે દ્વયાસત્ત્વાચ્ ચિન્માત્રઃ સર્વગોઽદ્વયઃ ॥

US-P11.005ab સ્વપ્નઃ સત્યો યથા ઽઽબોધાદ્ દેહાત્મત્વં તથૈવ ચ ।
US-P11.005cd પ્રત્યક્ષાદેઃ પ્રમાણત્વં જાગ્રત્ સ્યાદા ઽઽત્મવેદનાત્ ॥

US-P11.006ab વ્યોમવત્ સર્વભૂતસ્થો ભૂતદોષૈર્વિવર્જિતઃ ।
US-P11.006cd સાક્ષી ચેતાઽગુણઃ શુદ્ધો બ્રહ્મૈવાસ્મીતિ કેવલઃ ॥

US-P11.007ab નામરૂપક્રિયાભ્યોઽન્યો નિત્યમુક્તસ્વરૂપવાન્ ।
US-P11.007cd અહમાત્મા પરં બ્રહ્મ ચિન્માત્રોઽહં સદાદ્વયઃ ॥

US-P11.008ab અહં બ્રહ્માસ્મિ કર્તા ચ ભોક્તા ચાસ્મીતિ યે વિદુઃ ।

US-P11.008cd તે નષ્ટા જ્ઞાનકર્મભ્યાં નાસ્તિકાઃ સ્યુર્ન સંશયઃ ॥

US-P11.009ab ધર્માધર્મફલૈર્યોગ ઇષ્ટોઽદૃષ્ટો યથાત્મનઃ ।
US-P11.009cd શાસ્ત્રાદ્ બ્રહ્મત્વમપ્યસ્ય મોક્ષો જ્ઞાનાત્ તથેષ્યતામ્ ॥

US-P11.010ab યા માહારાજનાદ્યાસ્તા વાસનાઃ સ્વપ્નદર્શિભિઃ ।
US-P11.010cd અનુભૂયન્ત એવેહ તતોઽન્યઃ કેવલો દૃષિઃ ॥

US-P11.011ab કોશાદિવ વિનિષ્કૃષ્ટઃ કાર્યકારણવર્જિતઃ ।
US-P11.011cd યથાસિર્દૃશ્યતે સ્વપ્ને તદ્વદ્ બોદ્ધા સ્વયંપ્રભઃ ॥

US-P11.012ab આપેષાત્ પ્રતિબુદ્ધસ્ય જ્ઞસ્ય સ્વાભાવિકં પદમ્ ।
US-P11.012cd ઉક્તં નેત્યાદિવાક્યેન કલ્પિતસ્યાપનેતૃણા ॥

US-P11.013ab મહારાજાદયો લોકા મયિ યદ્વત્ પ્રકલ્પિતાઃ ।
US-P11.013cd સ્વપ્ને તદ્વદ્ દ્વયં વિદ્યાદ્ રૂપં વાસનયા સહ ॥

US-P11.014ab દેહલિઙ્ગાત્મના કાર્યા વાસનારૂપિણા ક્રિયા ।
US-P11.014cd નેતિનેત્યાત્મરૂપત્વાન્ ન મે કાર્યા ક્રિયા ક્વચિત્ ॥

US-P11.015ab ન તતોઽમૃતતાશાસ્તિ કર્મણોઽજ્ઞાનહેતુતઃ ।
US-P11.015cd મોક્ષસ્ય જ્ઞાનહેતુત્વાન્ ન તદન્યદપેક્ષતે ॥

US-P11.016ab અમૃતં ચાભયં નાર્તં નેતીત્યાત્મા પ્રિયો મમ ।
US-P11.016cd વિપરીતમતોઽન્યદ્ યત્ ત્યજેત્ તત્ સક્રિયં તતઃ ॥

US-P12.001ab પ્રકાશસ્થં યથા દેહં સાલોકમભિમન્યતે ।
US-P12.001cd દ્રષ્ટ્રાભાસં તથા ચિત્તં દ્રષ્ટાહમિતિ મન્યતે ॥

US-P12.002ab યદેવ દૃષ્યતે લોકે તેનાભિન્નત્વમાત્મનઃ ।
US-P12.002cd પ્રપદ્યતે તતો મૂઢસ્તેનાત્માનં ન વિન્દતિ ॥

US-P12.003ab દશમસ્ય નવાત્મત્વપ્રતિપત્તિવદાત્મનઃ ।
US-P12.003cd દૃશ્યેષુ તદ્વદેવાયં મૂઢો લોકો ન ચાન્યથા ॥

US-P12.004ab ત્વં કુરુ ત્વં તદેવેતિ પ્રત્યયાવેકકાલિકૌ ।
US-P12.004cd એકનીડૌ કથં સ્યાતાં વિરુદ્ધૌ ન્યાયતો વદ ॥

US-P12.005ab દેહાભિમાનિન્ દુઃખં નાદેહસ્યસ્વભાવતઃ ।
US-P12.005cd સ્વાપવત્ તત્પ્રહાણાય તત્ ત્વમિત્યુચ્યતે દૃશેઃ ॥

US-P12.006ab દૃશેશ્છાયા યદારૂઢા મુખચ્છાયેવ દર્શને ।
US-P12.006cd પશ્યંસ્તં પ્રત્યયં યોગી દૃષ્ટ આત્મેતિ મન્યતે ॥

US-P12.007ab તં ચ મૂઢં ચ યદ્યન્યં પ્રત્યયં વેત્તિ નો દૃશેઃ ।
US-P12.007cd સ એવ યોગિનાં શ્રેષ્ઠો નેતરઃ સ્યાન્ ન સંશયઃ ॥

US-P12.008ab વિજ્ઞાતેર્યસ્તુ વિજ્ઞાતા સ ત્વમિત્યુચ્યતે યતઃ ।
US-P12.008cd સ સ્યાદનુભવસ્તસ્ય તતોઽન્યોઽનુભવો મૃષા ॥

US-P12.009ab દૃશિરૂપે સદા નિત્યે દર્શનાદર્શને મયિ ।
US-P12.009cd કથં સ્યાતાં તતો નાન્ય ઇષ્યતેઽનુભવસ્તતઃ ॥

US-P12.010ab યત્સ્થસ્તાપો રવેર્દેહે દૃશેઃ સ વિષયો યથા ।
US-P12.010cd સત્ત્વસ્થસ્તદ્વદેવેહ દૃશેઃ સ વિષયસ્તથા ॥

US-P12.011ab પ્રતિષિદ્ધેદમંશો જ્ઞઃ ખમિવૈકરસોઽદ્વયઃ ।
US-P12.011cd નિત્યમુક્તસ્તથા શુદ્ધઃ સોઽહં બ્રહ્માસ્મિ કેવલઃ ॥

US-P12.012ab વિજ્ઞાતુર્નૈવ વિજ્ઞાતા પરોઽન્યઃ સંભવત્યતઃ ।
US-P12.012cd વિજ્ઞાતાહં પરો મુક્તઃ સર્વભૂતેષુ સર્વદા ॥

US-P12.013ab યો વેદાલુપ્તદૃષ્ટિત્વમાત્મનોઽકર્તૃતાં તથા ।
US-P12.013cd બ્રહ્મવિત્ત્વં તથા મુક્ત્વા સ આત્મજ્ઞો ન ચેતરઃ ॥

US-P12.014ab જ્ઞાતૈવાહમવિજ્ઞેયઃ શુદ્ધો મુક્તઃ સદેત્યપિ ।
US-P12.014cd વિવેકી પ્રત્યયો બુદ્ધેર્દૃશ્યત્વાન્ નાશવત્ત્વતઃ ॥

US-P12.015ab અલુપ્તા ત્વાત્મનો દૃષ્ટિર્નોત્પાદ્યા કારકૈર્યતઃ ।
US-P12.015cd દૃશ્યયા ચાન્યયા દૃષ્ટ્યા જન્યતાસ્યાઃ પ્રકલ્પિતા ॥

US-P12.016ab દેહાત્મબુદ્ધ્યપેક્ષત્વાદાત્મનઃ કર્તૃતા મૃષા ।
US-P12.016cd નૈવ કિંચિત્ કરોમીતિ સત્યા બુદ્ધિઃ પ્રમાણજા ॥

US-P12.017ab કર્તૃત્વં કારકાપેક્ષમકર્તૃત્વં સ્વભાવતઃ ।
US-P12.017cd કર્તા ભોક્તેતિ વિજ્ઞાનં મૃષૈવેતિ સુનિશ્ચિતમ્ ॥

US-P12.018ab એવં શાસ્ત્રાનુમાનાભ્યાં સ્વરૂપેઽવગતે સતિ ।
US-P12.018cd નિયોજ્યોઽહમિતિ હ્યેષા સત્યા બુદ્ધિઃ કથં ભવેત્ ॥

US-P12.019ab યથા સર્વાન્તરં વ્યોમ વ્યોમ્નોઽપ્યભ્યન્તરો હ્યહમ્ ।
US-P12.019cd નિર્વિકારોઽચલઃ શુદ્ધોઽજરો મુક્તઃ સદાદ્વયઃ ॥

US-P13.001ab અચક્ષુષ્ટ્વાન્ ન દૃષ્ટિર્મે તથાશ્રોતસ્ય કા શ્રુતિઃ ।
US-P13.001cd અવાક્ત્વાન્ ન તુ વક્તિઃ સ્યાદમનસ્ત્વાન્ મતિઃ કુતઃ ॥

US-P13.002ab અપ્રાણસ્ય ન કર્માસ્તિ બુદ્ધ્યભાવે ન વેદિતા ।
US-P13.002cd વિદ્યાવિદ્યે તતો ન સ્તશ્ચિન્માત્રજ્યોતિષો મમ ॥

US-P13.003ab નિત્યમુક્તસ્ય શુદ્ધસ્ય કૂટસ્થસ્યાવિચાલિનઃ ।
US-P13.003cd અમૃતસ્યાક્ષરસ્યૈવમશરીરસ્ય સર્વદા ॥

US-P13.004ab જિઘત્સા વા પિપાસા વા શોકમોહૌ જરામૃતી ।
US-P13.004cd ન વિદ્યન્તેઽશરીરત્વાદ્ વ્યોમવદ્ વ્યાપિનો મમ ॥

US-P13.005ab અસ્પર્શત્વાન્ ન મે સ્પૃષ્ટિર્નાજિહ્વત્વાદ્ રસજ્ઞતા ।
US-P13.005cd નિત્યવિજ્ઞાનરૂપસ્ય જ્ઞાનાજ્ઞાને ન મે સદા ॥

US-P13.006ab યા તુ સ્યાન્ માનસી વૃત્તિશ્ચાક્ષુષ્કા રૂપરઞ્જના ।
US-P13.006cd નિત્યમેવાત્મનો દૃષ્ટ્યા  નિત્યયા દૃશ્યતે હિ સા ॥

US-P13.007ab તથાન્યેન્દ્રિયયુક્તા યા વૃત્તયો વિષયાઞ્જનાઃ ।
US-P13.007cd સ્મૃતી રાગાદિરૂપા ચ કેવલાન્તર્મનસ્યપિ ॥

US-P13.008ab માનસ્યસ્તદ્વદન્યસ્ય દૃશ્યન્તે સ્વપ્નવૃત્તયઃ ।
US-P13.008cd દ્રષ્ટુર્દૃષ્ટિસ્તતો નિત્યા શુદ્ધાનન્તા ચ કેવલા ॥

US-P13.009ab અનિત્યા સાવિશુદ્ધેતિ ગૃહ્યતેઽત્રાવિવેકતઃ ।
US-P13.009cd સુખી દુઃખી તથા ચાહં દૃશ્યયોપાધિભૂતયા ॥

US-P13.010ab મૂઢયા મૂઢ ઇત્યેવં શુદ્ધયા શુદ્ધ ઇત્યપિ ।
US-P13.010cd મન્યતે સર્વલોકોઽયં યેન સંસારં ઋચ્છતિ ॥

US-P13.011ab અચક્ષુષ્ટ્વાદિશાસ્ત્રોક્તં સબાહ્યાભ્યન્તરં હ્યજમ્ ।
US-P13.011cd નિત્યમુક્તમિહાત્માનં મુમુક્ષુશ્ચેત્ સદા સ્મરેત્ ॥

US-P13.012ab અચક્ષુષ્ટ્વાદિશાસ્ત્રાચ્ ચ નેન્દ્રિયાણિ સદા મમ ।
US-P13.012cd અપ્રાણો હ્યમનાઃ શુભ્ર ઇતિ ચાથર્વણે વચઃ ॥

US-P13.013ab શબ્દાદીનામભાવશ્ચ શ્રૂયતે મમ કાઠકે ।
US-P13.013cd અપ્રાણો હ્યમના યસ્માદવિકારી સદા હ્યહમ્ ॥

US-P13.014ab વિક્ષેપો નાસ્તિ તસ્માન્ મે ન સમાધિસ્તતો મમ ।

US-P13.014cd વિક્ષેપો વા સમાધિર્વા મનસઃ સ્યાદ્ વિકારિણઃ ॥

US-P13.015ab અમનસ્કસ્ય શુદ્ધસ્ય કથં તત્ સ્યાદ્ દ્વયં મમ ।
US-P13.015cd અમનસ્ત્વાવિકારિત્વે વિદેહવ્યાપિનો મમ ॥

US-P13.016ab ઇત્યેતદ્ યાવદજ્ઞાનં તાવત્ કાર્યં મમાભવત્ ।
US-P13.016cd નિત્યમુક્તસ્ય શુદ્ધસ્ય બુદ્ધસ્ય ચ સદા મમ ॥

US-P13.017ab સમાધિર્વાસમાધિર્વા કાર્યં વાન્યત્ કુતો ભવેત્ ।
US-P13.017cd માં હિ ધ્યાત્વા ચ બુદ્ધ્વા ચ મન્યન્તે કૃતકૃત્યતામ્ ॥

US-P13.018ab અહં બ્રહ્માસ્મિ સર્વોઽસ્મિ શુદ્ધો બુદ્ધોઽસિતઃ સદા ।
US-P13.018cd અજઃ સર્વગ એવાહમજરશ્ચામૃતોઽક્ષયઃ ॥

US-P13.019ab મદન્યઃ સર્વભૂતેષુ બોદ્ધા કશ્ચિન્ ન વિદ્યતે ।
US-P13.019cd કર્માધ્યક્ષશ્ચ સાક્ષી ચ ચેતા નિત્યોઽગુણોઽદ્વયઃ ॥

US-P13.020ab ન સચ્ ચાહં ન ચાસચ્ ચ નોભયં કેવલઃ શિવઃ ।
US-P13.020cd ન મે સંધ્યા ન રાત્રિર્વા નાહર્વા સર્વદા દૃશેઃ ॥

US-P13.021ab સર્વમૂર્તિવિયુક્તં યદ્ યથા ખં સૂક્ષ્મમદ્વયમ્ ।
US-P13.021cd તેનાપ્યસ્મિ વિનાભૂતં બ્રહ્મૈવાહં તથાદ્વયમ્ ॥

US-P13.022ab મમાત્માસ્ય ત આત્મેતિ ભેદો વ્યોમ્નો યથા ભવેત્ ।
US-P13.022cd એકસ્ય સુષિભેદેન તથા મમ વિકલ્પિતઃ ॥

US-P13.023ab ભેદોઽભેદસ્તથા ચૈકો નાના ચેતિ વિકલ્પિતમ્ ।
US-P13.023cd જ્ઞેયં જ્ઞાતા ગતિર્ગન્તા મય્યેકસ્મિન્ કુતો ભવેત્ ॥

US-P13.024ab ન મે હેયં ન ચાદેયમવિકારી યતો હ્યહમ્ ।
US-P13.024cd સદા મુક્તસ્તથા શુદ્ધઃ સદા બુદ્ધોઽગુણોઽદ્વયઃ ॥

US-P13.025ab ઇત્યેવં સર્વદાત્માનાં વિદ્યાત્ સર્વં સમાહિતઃ ।
US-P13.025cd વિદિત્વા માં સ્વદેહસ્થં ઋષિર્મુક્તો ધ્રુવો ભવેત્ ॥

US-P13.026ab કૃતકૃત્યશ્ચ સિદ્ધશ્ચ યોગી બ્રાહ્મણ એવ ચ ।
US-P13.026cd યદૈવં વેદ તત્ત્વાર્થમન્યથા હ્યાત્મહા ભવેત્ ॥

US-P13.027ab વેદાર્થો નિશ્ચિતો હ્યેષ સમાસેન મયોદિતઃ ।
US-P13.027cd સંન્યાસિભ્યઃ પ્રવક્તવ્યઃ શાન્તેભ્યઃ શિષ્ટબુદ્ધિના ॥

US-P14.001ab સ્વપ્નસ્મૃત્યોર્ઘટાદેર્હિ રૂપાભાસઃ પ્રદૃશ્યતે ।
US-P14.001cd પુરા નૂનં તદાકારા ધીર્દૃષ્ટેત્યનુમીયતે ॥

US-P14.002ab ભિક્ષામટઅન્ યથા સ્વપ્ને દૃષ્ટો દેહો ન સ સ્વયમ્ ।
US-P14.002cd જાગ્રદ્દૃશ્યાત્ તથા દેહાદ્ દ્રષ્ટૃત્વાદન્ય એવ સઃ ॥

US-P14.003ab મૂષાસિક્તં યથા તામ્રં તન્નિભં જાયતે તથા ।
US-P14.003cd રૂપાદીન્ વ્યાપ્નુવચ્ ચિત્તં તન્નિભં દૃશ્યતે ધ્રુવમ્ ॥

US-P14.004ab વ્યઞ્જકો વા યથાલોકો વ્યઙ્ગ્યસ્યાકારતામિયાત્ ।
US-P14.004cd સર્વાર્થવ્યઞ્જકત્વાદ્ ધિરર્થાકારા પ્રદૃશ્યતે ॥

US-P14.005ab ધીરેવાર્થસ્વરૂપા હિ પુંસા દૃષ્ટા પુરાપિ ચ ।
US-P14.005cd ન ચેત્ સ્વપ્ને કથં પશ્યેત્ સ્મરતો વાકૃતિઃ કુતઃ ॥

US-P14.006ab વ્યઞ્જકત્વં તદેવાસ્યા રૂપાદ્યાકારદૃશ્યતા ।
US-P14.006cd દ્રષ્ટૃત્વં ચ દૃશેસ્તદ્વદ્ વ્યાપ્તિઃ સ્યાદ્ ધિય ઉદ્ભવે ॥

US-P14.007ab ચિન્માત્રજ્યોતિષા સર્વાઃ સર્વદેહેષુ બુદ્ધયઃ ।
US-P14.007cd મયા યસ્માત્ પ્રકાશ્યન્તે સર્વસ્યાત્મા તતો હ્યહમ્ ॥

US-P14.008ab કરણં કર્મ કર્તા ચ ક્રિયા સ્વપ્ને ફલં ચ ધીઃ ।
US-P14.008cd જાગ્રત્યેવં યતો દૃષ્ટા દ્રષ્ટા તસ્માત્ તતોઽન્યથા ॥

US-P14.009ab બુદ્ધ્યાદીનામનાત્મત્વં હેયોપાદેયરૂપતઃ ।
US-P14.009cd હાનોપાદાનકર્તાત્મા ન ત્યાજ્યો ન ચ ગૃહ્યતે ॥

US-P14.010ab સબાહ્યાભ્યન્તરે શુદ્ધે પ્રજ્ઞાનૈકરસે ઘને ।
US-P14.010cd બાહ્યમાભ્યન્તરં ચાન્યત્ કથં હેયં પ્રકલ્પ્યતે ॥

US-P14.011ab ય આત્મા નેતિ નેતીતિ પરાપોહેન શેષિતઃ ।
US-P14.011cd સ ચેદ્ બ્રહ્મવિદાત્મેષ્ટો યતેતાતઃ પરં કથમ્ ॥

US-P14.012ab અશનાયાદ્યતિક્રાન્તં બ્રહ્મૈવાસ્મિ નિરન્તરમ્ ।
US-P14.012cd કાર્યવાન્ સ્યાં કથં ચાહં વિમૃશેદેવમઞ્જસા ॥

US-P14.013ab પારગસ્તુ યથા નદ્યાસ્તત્સ્થઃ પારં યિયાસતિ ।
US-P14.013cd આત્મજ્ઞશ્ચેત્ તથા કાર્યં કર્તુમન્યદિહેચ્છતિ ॥

US-P14.014ab આત્મજ્ઞસ્યાપિ યસ્ય સ્યાદ્ ધાનોપાદાનતા યદિ ।
US-P14.014cd અ મોક્ષાર્હઃ સ વિજ્ઞેયો વાન્તોઽસૌ બ્રહ્મણા ધ્રુવમ્ ॥

US-P14.015ab સાદિત્યં હિ જગત્ પ્રાણસ્તસ્માન્ નાહર્નિશૈવ વા ।
US-P14.015cd પ્રાણજ્ઞસ્યાપિ ન સ્યાતાં કુતો બ્રહ્મવિદોઽદ્વયે ॥

US-P14.016ab ન સ્મરત્યાત્મનો હ્યાત્મા વિસ્મરેદ્ વાપ્યલુપ્તચિત્ ।
US-P14.016cd મનોઽપિ સ્મરતીત્યેતજ્ જ્ઞાનમજ્ઞાનહેતુજમ્ ॥

US-P14.017ab જ્ઞાતુર્જ્ઞેયઃ પરો હ્યાત્મા સોઽવિદ્યાકલ્પિતઃ સ્મૃતઃ ।
US-P14.017cd અપોઢે વિદ્યયા તસ્મિન્ રજ્જ્વાં સર્પ ઇવાદ્વયઃ ॥

US-P14.018ab કર્તૃકર્મફલાભાવાત્ સબાહ્યાભ્યન્તરં હ્યજમ્ ।
US-P14.018cd મમાહં ચેતિ યો ભાવસ્તસ્મિન્ કસ્ય કુતો ભવેત્ ॥

US-P14.019ab આત્મા હ્યાત્મીય ઇત્યેષ ભાવોઽવિદ્યાપ્રકલ્પિતઃ ।
US-P14.019cd આત્મૈકત્વે હ્યસૌ નાસ્તિ બીજાભાવે કુતઃ ફલમ્ ॥

US-P14.020ab દ્રષ્ટૃ શ્રોતૃ તથા મન્તૃ વિજ્ઞાત્રેવ તદક્ષરમ્ ।
US-P14.020cd દ્રષ્ટ્રાદ્યન્યન્ ન તદ્ યસ્માત્ તસ્માદ્ દ્રષ્ટાહમક્ષરમ્ ॥

US-P14.021ab સ્થાવરં જઙ્ગમં ચૈવ દ્રષ્ટૃત્વાદિક્રિયાયુતમ્ ।
US-P14.021cd સર્વમક્ષરમેવાતઃ સર્વસ્યાત્માક્ષરં ત્વહમ્ ॥

US-P14.022ab અકાર્યશેષમાત્માનમક્રિયાત્મક્રિયાફલમ્ ।
US-P14.022cd નિર્મમં નિરહંકારં યઃ પશ્યતિ સ પશ્યતિ ॥

US-P14.023ab મમાહંકારયત્નેચ્છાઃ શૂન્યા એવ સ્વભાવતઃ ।
US-P14.023cd આત્મનીતિ યદિ જ્ઞાતમાધ્વં સ્વસ્થાઃ કિમીહિતૈઃ ॥

US-P14.024ab યોઽહંકર્તારમાત્માનં તથા વેત્તારમેવ યઃ ।
US-P14.024cd વેત્ત્યનાત્મજ્ઞ એવાસૌ યોઽન્યથાજ્ઞઃ સ આત્મવિત્ ॥

US-P14.025ab યથાન્યત્વેઽપિ તાદાત્મ્યં દેહાદિષ્વાત્મનો મતમ્ ।
US-P14.025cd તથાકર્તુરવિજ્ઞાનાત્ ફલકર્માત્મતાત્મનઃ ॥

US-P14.026ab દૃષ્ટિઃ શ્રુતિર્મતિર્જ્ઞાતિઃ સ્વપ્ને દૃષ્ટા જનૈઃ સદા ।
US-P14.026cd તાસામાત્મસ્વરૂપત્વાદતઃ પ્રત્યક્ષતાત્મનઃ ॥

US-P14.027ab પરલોકભયં યસ્ય નાસ્તિ મૃત્યુભયં તથા ।
US-P14.027cd તસ્યાત્મજ્ઞસ્ય શોચ્યાઃ સ્યુઃ સબ્રહ્મેન્દ્રા અપીશ્વરાઃ ॥

US-P14.028ab ઈશ્વરત્વેન કિં તસ્ય બ્રહ્મેન્દ્રત્વેન વા પુનઃ ।

US-P14.028cd તૃષ્ણા ચેત્ સર્વતશ્છિન્ના સર્વદૈન્યોદ્ભવાશુભા ॥

US-P14.029ab અહમિત્યાત્મધીર્યા ચ મમ્મેત્યાત્મીયધીરપિ ।
US-P14.029cd અર્થશૂન્યે યદા યસ્ય સ આત્મજ્ઞો ભવેત્ તદા ॥

US-P14.030ab બુદ્ધ્યાદૌ સત્યુપાધૌ ચ તથાસત્યવિશેષતા ।
US-P14.030cd યસ્ય ચેદાત્મનો જ્ઞાતા તસ્ય કાર્યં કથં ભવેત્ ॥

US-P14.031ab પ્રસન્ને વિમલે વ્યોમ્નિ પ્રજ્ઞાનૈકરસેઽદ્વયે ।
US-P14.031cd ઉત્પન્નાત્મધિયો બ્રૂત કિમન્યત્ કાર્યમિષ્યતે ॥

US-P14.032ab આત્માનં સર્વભૂતસ્થમમિત્રં ચાત્મનોઽપિ યઃ ।
US-P14.032cd પશ્યન્નિચ્છત્યસૌ નૂનં શીતીકર્તું વિભાવસુમ્ ॥

US-P14.033ab પ્રજ્ઞાપ્રાણાનુકાર્યાત્મા છાયેવાક્ષાદિગોચરઃ ।
US-P14.033cd ધ્યાયતીવેતિ ચોક્તો હિ શુદ્ધો મુક્તઃ સ્વતો હિ સઃ ॥

US-P14.034ab અપ્રાણસ્યામનસ્કસ્ય તથાસંસર્ગિણો દૃશેઃ ।
US-P14.034cd વ્યોમવદ્ વ્યાપિનો હ્યસ્ય કથં કાર્યં ભવેન્ મમ ॥

US-P14.035ab અસમાધીં ન પશ્યામિ નિર્વિકારસ્ય સર્વદા ।
US-P14.035cd બ્રહ્મણો મે વિશુદ્ધસ્ય શોધ્યં ચાન્યદ્ વિપાપ્મનઃ ॥

US-P14.036ab ગન્તવ્યં ચ તથૈવાહં સર્વગસ્યાચલસ્ય ચ ।
US-P14.036cd નોર્ધ્વં નાધસ્તિરો વાપિ નિષ્કલસ્યાગુણત્વતઃ ॥

US-P14.037ab ચિન્માત્રજ્યોતિષો નિત્યં તમસ્તસ્મિન્ ન વિદ્યતે ।
US-P14.037cd કથં કાર્યં મમૈવાદ્ય નિત્યમુક્તસ્ય શિષ્યતે ॥

US-P14.038ab અમનસ્કસ્ય કા ચિન્તા ક્રિયા વાનિન્દ્રિયસ્ય કા ।
US-P14.038cd અપ્રાણો હ્યમનાઃ શુભ્ર ઇતિ સત્યં શ્રુતેર્વચઃ ॥

US-P14.039ab અકાલત્વાદદેશત્વાદદિકત્વાદનિમિત્તઃ ।
US-P14.039cd આત્મનો નૈવ કાલાદેરપેક્ષા ધ્યાયતઃ સદા ॥

US-P14.040ab યસ્મિન્ દેવાશ્ચ વેદશ્ચ પવિત્રં કૃત્સ્નમેકતામ્ ।
US-P14.040cd વ્રજેત્ તન્ માનસં તીર્થં યસ્મિન્ સ્નાત્વામૃતો ભવેત્ ॥

US-P14.041ab ન ચાસ્તિ શબ્દાદિરનન્યવેદનઃ પરસ્પરેણાપિ ન ચૈવ દૃશ્યતે ।
US-P14.041cd પરેણ દૃશ્યાસ્તુ યથા રસાદયસ્તથૈવ દૃશ્યત્વત એવ દૈહિકાઃ ॥

US-P14.042ab અહં મમેત્યેષણયત્નવિક્રિયાઃ સુખાદયસ્તદ્વદિહ પ્રદૃશ્યતઃ ।
US-P14.042cd દૃશ્યત્વયોગાચ્ ચ પરસ્પરેણ તે ન દૃશ્યતાં યાન્તિ તતઃ પરો ભવેત્ ॥

US-P14.043ab અહંક્રિયાદ્યા હિ સમસ્તવિક્રિયા સકર્તૃકા કર્મફલેન સંહિતા ।
US-P14.043cd ચિતિસ્વરૂપેણ સમન્તતોઽર્કવત્ પ્રકાશ્યમાનાસિતતાત્મનો હ્યતઃ ॥

US-P14.044ab દૃશિસ્વરૂપેણ હિ સર્વદેહિનાં વિયદ્ યથા વ્યાપ્ય મનાંસ્યવસ્થિતઃ ।
US-P14.044cd અતો ન તસ્માદપરોઽસ્તિ વેદિતા પરોઽપિ તસ્માદત એક ઈશ્વરઃ ॥

US-P14.045ab શરીરબુદ્ધ્યોર્યદિ ચાન્યદૃશ્યતા નિરાત્મવાદાઃ સુનિરાકૃતા મયા ।
US-P14.045cd પરશ્ચ સિદ્ધો હ્યવિશુદ્ધિકર્મતઃ સુનિર્મલઃ સર્વગતોઽસિતોઽદ્વયઃ ॥

US-P14.046ab ઘટાદિરૂપં યદિ તે ન ગૃહ્યતે મનઃ પ્રવૃત્તં બહુધા સ્વવૃત્તિભિઃ ।
US-P14.046cd અશુદ્ધ્યચિદ્રૂપવિકારદોષતા મતેર્યથા વારયિતું ન પાર્યતે ॥

US-P14.047ab યથા વિશુદ્ધં ગગનં નિરન્તરં ન સજ્જતે નાપિ ચ લિપ્યતે તથા ।
US-P14.047cd સમસ્તભૂતેષુ સદૈવ તેષ્વયં સમઃ સદાત્મા હ્યજરોઽમરોઽભયઃ ॥

US-P14.048ab અમૂર્તમૂર્તાનિ ચ કર્મવાસના દૃશિસ્વરૂપસ્ય બહિઃ પ્રકલ્પિતાઃ ।
US-P14.048cd અવિદ્યયા હ્યાત્મનિ મૂઢદૃષ્ટિભિરપોહ્ય નેતીતિ અવશેષિતો દૃશિઃ ॥

US-P14.049ab પ્રબોધરૂપં મનસોઽર્થયોગજં સ્મૃતૌ ચ સુપ્તસ્ય ચ દૃશ્યતેઽર્થવત્ ।
US-P14.049cd તથૈવ દેહપ્રતિમાનતઃ પૃથગ્ દૃશેઃ શરીરં ચ મનશ્ચ દૃશ્યતઃ ॥

US-P14.050ab સ્વભાવશુદ્ધે ગગને ઘનાદિકે મલેઽપાયતે સતિ ચાવિશેષતા ।
US-P14.050cd યથા ચ તદ્વચ્ છ્રુતિવારિતદ્વયે સદાવિશેષો ગગનોપમે દૃશૌ ॥

US-P15.001ab નાન્યદન્યદ્ ભવેદ્ યસ્માન્ નાન્યત્ કિંચિદ્ વિચિન્તયેત્ ।
US-P15.001cd અન્યસ્યાન્યત્વભાવે હિ નાશસ્તસ્ય ધ્રુવો ભવેત્ ॥

US-P15.002ab સ્મરતો દૃશ્યતે દૃષ્ટં પટે ચિત્રમિવાર્પિતમ્ ।
US-P15.002cd યત્ર યેન ચ તૌ જ્ઞેયૌ સત્ત્વક્ષેત્રજ્ઞસંજ્ઞકૌ ॥

US-P15.003ab ફલાન્તં ચાનુભૂતં યદ્ યુક્તં કર્ત્રાદિકારકૈઃ ।
US-P15.003cd સ્મર્યમાણં હિ કર્મસ્થં પૂર્વં કર્મૈવ તત્ તતઃ ॥

US-P15.004ab દ્રષ્ટુશ્ચાન્યદ્ ભવેદ્ દૃશ્યં દૃશ્યત્વાદ્ ઘટવત્ સદા ।
US-P15.004cd દૃશ્યાદ્ દ્રષ્ટાસજાતીયો ન ધીવત્ સાક્ષિતાન્યથા ॥

US-P15.005ab સ્વાત્મબુદ્ધિમપેક્ષ્યાસૌ વિધીનાં સ્યાત્ પ્રયોજકઃ ।
US-P15.005cd જાત્યાદિઃ શવવત્ તેન તદ્વન્ નાનાત્મતાન્યથા ॥

US-P15.006ab ન પ્રિયાપ્રિય ઇત્યુક્તેનાર્દેહત્વં ક્રિયાફલમ્ ।
US-P15.006cd દેહયોગઃ ક્રિયાહેતુસ્તસ્માદ્ વિદ્વાન્ ક્રિયાસ્ત્યજેત્ ॥

US-P15.007ab કર્મસ્વાત્મા સ્વતન્ત્રશ્ચેન્ નિવૃત્તૌ ચ તથેષ્યતામ્ ।
US-P15.007cd અદેહત્વે ફલેઽકાર્યે જ્ઞાતે કુર્યાત્ કથં ક્રિયાઃ ॥

US-P15.008ab જાત્યાદીન્ સમ્પરિત્યજ્ય નિમિત્તં કર્મણાં બુધઃ ।
US-P15.008cd કર્મહેતુવિરુદ્ધં યત્ સ્વરૂપં શાસ્ત્રતઃ સ્મરેત્ ॥

US-P15.009ab આત્મૈકઃ સર્વભૂતેષુ તાનિ તસ્મિંશ્ચ ખે યથા ।
US-P15.009cd પર્યગાદ્ વ્યોમવત્ સર્વં શુક્રં દીપ્તિમદિષ્યતે ॥

US-P15.010ab વ્રણસ્નાય્વોરભાવેન સ્થૂલં દેહં નિવારયેત્ ।
US-P15.010cd શુદ્ધાપાપતયા લેપં લિઙ્ગં ચાકાયમિત્યુત ॥

US-P15.011ab વાસ્દેવો યથાશ્વત્થે સ્વદેહે ચાબ્રવીત્ સમમ્ ।
US-P15.011cd તદ્વદ્ વેત્તિ ય આત્માનં સમં સ બ્રહ્મવિત્તમઃ ॥

US-P15.012ab યથા હ્યન્યશરીરેષુ મમાહન્તા ન ચેષ્યતે ।
US-P15.012cd અસ્મિંશ્ચાપિ તથા દેહે ધીસાક્ષિત્વાવિશેષતઃ ॥

US-P15.013ab રૂપસંસ્કારતુલ્યાધી રાગદ્વેષૌ ભયં ચ યત્ ।
US-P15.013cd ગૃહ્યતે ધીશ્રયં તસ્માજ્ જ્ઞાતા શુદ્ધોઽભયઃ સદા ॥

US-P15.014ab યન્મનાસ્તન્મયોઽન્યત્વે નાત્મત્વાપ્તૌ ક્રિયાત્મનિ ।
US-P15.014cd આત્મત્વે ચાનપેક્ષત્વાત્ સાપેક્ષં હિ ન તત્ સ્વયમ્ ॥

US-P15.015ab ખમિવૈકરસા જ્ઞપ્તિરવિભક્તાજરામલા ।
US-P15.015cd ચક્ષુરાદ્યુપધાનાત્ સા વિપરીતા વિભાવ્યતે ॥

US-P15.016ab દૃશ્યત્વાદહમિત્યેષ નાત્મધર્મો ઘટાદિવત્ ।
US-P15.016cd તથાન્યે પ્રત્યયા જ્ઞેયા દોષશ્ચાત્મમલો હ્યતઃ ॥

US-P15.017ab સર્વપ્રત્યયસાક્ષિત્વાદવિકારી ચ સર્વગઃ ।
US-P15.017cd વિક્રિયેત યદિ દ્રષ્ટા બુદ્ધ્યાદીવાલ્પવિદ્ ભવેત્ ॥

US-P15.018ab ન દૃષ્ટિર્લુપ્યતે દ્રષ્ટુશ્ચક્ષુરાદેર્યથૈવ તુ ।
US-P15.018cd નહિ દ્રષ્ટુરિતિ હ્યુક્તં તસ્માદ્ દ્રષ્ટા સદૈવ ભુક્ ॥

US-P15.019ab સંઘાતો વાસ્મિ ભૂતાનાં કરણાનાં તથૈવ ચ ।

US-P15.019cd વ્યસ્તં વાન્યતમો વાસ્મિ કો વાસ્મીતિ વિચારયેત્ ॥

US-P15.020ab વ્યસ્તં નાહં સમસ્તં વા ભૂતમિન્દ્રિયમેવ વા ।
US-P15.020cd જ્ઞેયત્વાત્ કરણત્વાચ્ ચ જ્ઞાતાન્યોઽસ્માદ્ ઘટાદિવત્ ॥

US-P15.021ab આત્માગ્નેરિન્ધના બુદ્ધિરવિદ્યાકામકર્મભિઃ ।
US-P15.021cd દીપિતા પ્રજ્વલત્યેષા દ્વારૈઃ શ્રોત્રાદિભિઃ સદા ॥

US-P15.022ab દક્ષિણાક્ષિપ્રધાનેષુ યદા બુદ્ધિર્વિચેષ્ટતે ।
US-P15.022cd વિષયૈર્હવિષા દીપ્તા આત્માગ્નિઃ સ્થૂલભુક્ તદા ॥

US-P15.023ab હૂયન્તે તુ હવિંષીતિ રૂપાદિગ્રહણે સ્મરન્ ।
US-P15.023cd અરાગદ્વેષ આત્માગ્નૌ જાગ્રદ્દોષૈર્ન લિપ્યતે ॥

US-P15.024ab માનસે તુ ગૃહે વ્યક્તા અવિદ્યાકર્મવાસનાઃ ।
US-P15.024cd પશ્યંસ્તૈજસ આત્મોક્તઃ સ્વયંજ્યોતિઃપ્રકાશિતાઃ ॥

US-P15.025ab વિષયા વાસના વાપિ ચોદ્યન્તે નૈવ કર્મભિઃ ।
US-P15.025cd યદા બુદ્ધૌ તદા જ્ઞેયઃ પ્રાજ્ઞ આત્મા હ્યનન્યદૃક્ ॥

US-P15.026ab મનોબુદ્ધીન્દ્રિયાણાં યા અવસ્થાઃ કર્મચોદિતાઃ ।
US-P15.026cd ચૈતન્યેનૈવ ભાસ્યન્તે રવિણેવ ઘટાદયઃ ॥

US-P15.027ab તત્રૈવં સતિ બુદ્ધીર્જ્ઞ આત્મભાસાવભાસયન્ ।
US-P15.027cd કર્તા તાસાં યદર્થાસ્તા મૂઢૈરેવાભિધીયતે ॥

US-P15.028ab સર્વજ્ઞોઽપ્યત એવ સ્યાત્ સ્વેન ભાસાવભાસયન્ ।
US-P15.028cd સર્વં સર્વક્રિયાહેતોઃ સર્વકૃત્ત્વં તથાત્મનઃ ॥

US-P15.029ab સોપાધિશ્ચૈવમાત્મોક્તો નિરુપાખ્યોઽનુપાધિકઃ ।
US-P15.029cd નિષ્કલો નિર્ગુણઃ શુદ્ધસ્તં મનો વાક્ ચ નાપ્નુતઃ ॥

US-P15.030ab ચેતનોઽચેતનો વાપિ કર્તાકર્તા ગતોઽગતઃ ।
US-P15.030cd બદ્ધો મુક્તસ્તથા ચૈકો નૈકઃ શુદ્ધોઽન્યથેતિ વા ॥

US-P15.031ab અપ્રાપ્યૈવ નિવર્તન્તે વાચો ધીભિઃ સહૈવ તુ ।
US-P15.031cd નિર્ગુણત્વાત્ ક્રિયાભાવાદ્ વિશેષાણાં હ્યભાવતઃ ॥

US-P15.032ab વ્યાપકં સર્વતો વ્યોમ મૂર્તૈઃ સર્વૈર્વિયોજિતમ્ ।
US-P15.032cd યથા તદ્વદિહાત્માનં વિદ્યાચ્છુદ્ધં પરં પદમ્ ॥

US-P15.033ab દૃષ્ટં હિત્વા સ્મૃતિં તસ્મિન્ સર્વગ્રશ્ચ તમસ્ત્યજેત્ ।
US-P15.033cd સર્વદૃગ્ જ્યોતિષા યુક્તો દિનકૃચ્છાર્વરં યથા ॥

US-P15.034ab રૂપસ્મૃત્યન્ધકારાર્થાઃ પ્રત્યયા યસ્ય ગોચરાઃ ।
US-P15.034cd સ એવાત્મા સમો દ્રષ્ટા સર્વભૂતેષુ સર્વગઃ ॥

US-P15.035ab આત્મબુદ્ધિમનશ્ચક્ષુર્વિષયાલોકસંગમાત્ ।
US-P15.035cd વિચિત્રો જાયતે બુદ્ધેઃ પ્રત્યયોઽજ્ઞાનલક્ષણઃ ॥

US-P15.036ab વિવિચ્યાસ્માત્ સ્વમાત્માનં વિદ્યાચ્છુદ્ધં પરં પદમ્ ।
US-P15.036cd દ્રષ્ટારં સર્વભૂતસ્થં સમં સર્વભયાતિગમ્ ॥

US-P15.037ab સમસ્તં સર્વગં શાન્તં વિમલં વ્યોમવત્ સ્થિતમ્ ।
US-P15.037cd નિષ્કલં નિષ્ક્રિયં સર્વં નિત્યં દ્વન્દ્વૈર્વિવર્જિતમ્ ॥

US-P15.038ab સર્વપ્રત્યયસાક્ષી જ્ઞઃ કથં જ્ઞેયો મયેત્યુત ।
US-P15.038cd વિમૃશ્યૈવં વિજાનીયાજ્ જ્ઞાતં બ્રહ્મ ન વેત્તિ વા ॥

US-P15.039ab અદૃષ્ટં દ્રષ્ટ્રવિજ્ઞાતં દભ્રમિત્યાદિશાસનાત્ ।
US-P15.039cd નૈવ જ્ઞેયં મયાન્યૈર્વા પરં બ્રહ્મ કથંચન ॥

US-P15.040ab સ્વરૂપાવ્યવધાનાભ્યાં જ્ઞાનાલોકસ્વભાવતઃ ।
US-P15.040cd અન્યજ્ઞાનાનપેક્ષત્વાજ્ જ્ઞાતં ચૈવ સદા મયા ॥

US-P15.041ab નાન્યેન જ્યોતિષા કાર્યં રવેરાત્મપ્રકાશને ।
US-P15.041cd સ્વબોધાન્ નાન્યબોધેચ્છા બોધસ્યાત્મપ્રકાશને ॥

US-P15.042ab ન તસ્યૈવાન્યતોઽપેક્ષા સ્વરૂપં યસ્ય યદ્ ભવેત્ ।
US-P15.042cd પ્રકાશાન્તરદૃશ્યો ન પ્રકાજ઼્ઞો હ્યસ્તિ કશ્ચન ॥

US-P15.043ab વ્યક્તિઃ સ્યાદપ્રકાશસ્ય પ્રકાશાત્મસમાગમાત્ ।
US-P15.043cd પ્રકાશસ્ત્વર્કકાર્યઃ સ્યાદિતિ મિથ્યા વચો હ્યતઃ ॥

US-P15.044ab યતોઽભૂત્વા ભવેદ્ યચ્ચ તસ્ય તત્ કાર્યમિષ્યતે ।
US-P15.044cd સ્વરૂપત્વાદભૂત્વા ન પ્રકાશો જાયતે રવેઃ ॥

US-P15.045ab સત્તામાત્રે પ્રકાશસ્ય કર્તાદિત્યાદિરિષ્યતે ।
US-P15.045cd ઘટાદિવ્યક્તિતો યદ્વત્ તદ્વદ્ બોધાત્મનીષ્યતામ્ ॥

US-P15.046ab બિલાત્ સર્પસ્ય નિર્યાણે સૂર્યો યદ્વત્ પ્રકાશકઃ ।
US-P15.046cd પ્રયત્નેન વિના તદ્વજ્ જ્ઞાતાત્મા બોધરૂપતઃ ॥

US-P15.047ab દગ્ધૈવમુષ્ણઃ સત્તાયાં તદ્વદ્ બોધાત્મનીષ્યતામ્ ।
US-P15.047cd સત્યેવ યદુપાધૌ તુ જ્ઞાતે સર્પ ઇવોત્થિતે ॥

US-P15.048ab જ્ઞાતાયત્નોઽપિ તદ્વજ્ જ્ઞઃ કર્તા ભ્રામકવદ્ ભવેત્ ।
US-P15.048cd સ્વરૂપેણ સ્વયં નાત્મા જ્ઞેયોઽજ્ઞેયોઽથવા તતઃ ॥

US-P15.049ab વિદિતાવિદિતાભ્યાં તદન્યદેવેતિ શસનાત્ ।
US-P15.049cd બન્ધમોક્ષાદયો ભાવાસ્તદ્વદાત્મનિ કલ્પિતાઃ ॥

US-P15.050ab નાહોરાત્રે યથા સૂર્યે પ્રભારૂપાવિશેષતઃ ।
US-P15.050cd બોધરૂપાવિશેષાન્ ન બોધાબોધૌ તથાત્મનિ ॥

US-P15.051ab યથોક્તં બ્રહ્મ યો વેદ હાનોપાદાનવર્જિતમ્ ।
US-P15.051cd યથોક્તેન વિધાનેન સ સત્યં નૈવ શક્નુયાત્ ॥

US-P15.052ab જન્મમૃત્યુપ્રવાહેષુ પતિતો નૈવ શક્નુયાત્ ।
US-P15.052cd ઇત ઉદ્ધર્તુમાત્માનં જ્ઞાનાદન્યેન કેનચિત્ ॥

US-P15.053ab ०ક઼્ ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
US-P15.053cd ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટcક઼્ ઇતિ શ્રુતેઃ ॥

US-P15.054ab મમાહમિત્યેતદપોહ્ય સર્વતો વિમુક્તદેહં પદમમ્બરોપમમ્ ।
US-P15.054cd સુદૃષ્ટશાત્રાનુમિતિભ્ય ઈરિતં વિમુચ્યતેઽસ્મિન્ યદિ નિશ્ચિતો નરઃ ॥

US-P16.001ab પાર્થિવઃ કઠિનો ધાતુર્દ્રવો દેહે સ્મૃતોઽમ્મયઃ ।
US-P16.001cd પક્તિચેષ્ટાવકાશાઃ સ્યુર્વહ્નિવાય્વમ્બરોદ્ભવાઃ ॥

US-P16.002ab ઘ્રાણાદીનિ તદર્થાશ્ચ પૃથિવ્યાદિગુણાઃ ક્રમાત્ ।
US-P16.002cd રૂપાલોકવદિષ્ટં હિ સજાતીયાર્થમિન્દ્રિયમ્ ॥

US-P16.003ab બુદ્ધ્યર્થાન્યાહુરેતાનિ વાક્પાણ્યાદીનિ કર્મણે ।
US-P16.003cd તદ્વિકલ્પાર્થમન્તસ્થં મન એકાદશં ભવેત્ ॥

US-P16.004ab નિશ્ચયાર્થા ભવેદ્ બુદ્ધિસ્તાં સર્વાર્થાનુભાવિનીમ્ ।
US-P16.004cd જ્ઞાતામોક્તઃ સ્વરૂપેણ જ્યોતિષા વ્યઞ્જયન્ સદા ॥

US-P16.005ab વ્યઞ્જકસ્તુ યથાલોકો વ્યઙ્ગ્યસ્યાકારતાં ગતઃ ।
US-P16.005cd વ્યતિકીર્ણોઽપ્યસંકીર્નસ્તદ્વજ્ જ્ઞઃ પ્રત્યયૈઃ સદા ॥

US-P16.006ab સ્થિતો દીપો યથાયત્નઃ પ્રાપ્તં સર્વં પ્રકાશયેત્ ।

US-P16.006cd શબ્દાદ્યાકારબુદ્ધીર્જ્ઞઃ પ્રાપ્તાસ્તદ્વત્ પ્રપશ્યતિ ॥

US-P16.007ab શરીરેન્દ્રિયસંઘાત આત્મત્વેન ગતાં ધિયમ્ ।
US-P16.007cd નિત્યાત્મજ્યોતિષા દીપ્તાં વિશિંશન્તિ સુખાદયઃ ॥

US-P16.008ab શિરોદુઃખાદિનાત્માનં દુઃખ્યસ્મીતિ હિ પશ્યતિ ।
US-P16.008cd દ્રષ્ટાન્યો દુઃખિનો દૃશ્યાદ્ દ્રષ્ટૃત્વાચ્ ચ ન દુઃખ્યસૌ ॥

US-P16.009ab દુઃખી સ્યાદ્ દુઃખ્યહંમાનાદ્ દુઃખિનો દર્શનાન્ ન વા ।
US-P16.009cd સંહતેઽઙ્ગાદિભિર્દ્રષ્ટા દુઃખી દુઃખસ્ય નૈવ સઃ ॥

US-P16.010ab ચક્ષુર્વત્ કર્મકર્તૃત્વં સ્યાચ્ ચેન્ નાનેકમેવ તત્ ।
US-P16.010cd સંહતં ચ તતો નાત્મા દ્રષ્ટૃત્વાત્ કર્મતાં વ્રજેત્ ॥

US-P16.011ab જ્ઞાનયત્નાદ્યનેકત્વમાત્મનોઽપિ મતં યદિ ।
US-P16.011cd નૈકજ્ઞાનગુણત્વાત્ તુ જ્યોતિર્વત્ તસ્ય કર્મતા ॥

US-P16.012ab જ્યોતિષો દ્યોતકત્વેઽપિ યદ્વન્ નાત્મપ્રકાશનમ્ ।
US-P16.012cd ભેદેઽપ્યેવં સમત્વાજ્ જ્ઞ આત્માનં નૈવ પશ્યતિ ॥

US-P16.013ab યદ્ધર્મા યઃ પદાર્થો ન તસ્યૈવેયાત્ સ કર્મતામ્ ।
US-P16.013cd ન હ્યાત્માનં દહત્યગ્નિસ્તથા નૈવ પ્રકાશયેત્ ॥

US-P16.014ab એતેનૈવાત્મનાત્મનો ગ્રહો બુદ્ધેર્નિરાકૃતઃ ।
US-P16.014cd અંશોઽપ્યેવં સમત્વાદ્ ધિ નિર્ભેદત્વાન્ ન યુજ્યતે ॥

US-P16.015ab શૂન્યતાપિ ન યુક્તૈવં બુદ્ધેરન્યેન દૃશ્યતા ।
US-P16.015cd ઉક્તાતો ઘટવત્ તસ્યાઃ પ્રાક્ સિદ્ધેશ્ચ વિકલ્પતઃ ॥

US-P16.016ab અવિકલ્પં તદસ્ત્યેવ યત્ પૂર્વં સ્યાદ્ વિકલ્પતઃ ।
US-P16.016cd વિકલ્પોત્પત્તિહેતુત્વાદ્ યદ્યસ્યૈવ ચ કારણમ્ ॥

US-P16.017ab અજ્ઞાનં કલ્પનામૂલં સંસારસ્ય નિયામકમ્ ।
US-P16.017cd હિત્વાત્માનં પરં બ્રહ્મ વિયાન્ મુક્તં સદાભયમ્ ॥

US-P16.018ab જાગ્રત્સ્વપ્નૌ તયોર્બીજં સુષુપ્તાખ્યં તમોમયમ્ ।
US-P16.018cd અન્યોન્યસ્મિન્નસત્ત્વાચ્ ચ નાસ્તીત્યેતત્ ત્રયં ત્યજેત્ ॥

US-P16.019ab આત્મબુદ્ધિમનશ્ચક્ષુરાલોકાર્થાદિસંકરાત્ ।
US-P16.019cd ભ્રાન્તિઃ સ્યાદાત્મકર્મેતિ ક્રિયાણાં સંનિપાતતઃ ॥

US-P16.020ab નિમીલોન્મીલને સ્થાને વાયવ્યે તે ન ચક્ષુષઃ ।
US-P16.020cd પ્રકાશત્વાન્ મનસ્યેવં બુદ્ધૌ ન સ્તઃ પ્રાકાશતઃ ॥

US-P16.021ab સંકલ્પાધ્યવસાયૌ તુ મનોબુદ્ધ્યોર્યથાક્રમાત્ ।
US-P16.021cd નેતરેતરધર્મત્વં સર્વં ચાત્મનિ કલ્પિતમ્ ॥

US-P16.022ab સ્થાનાવચ્છેદદૃષ્ટિઃ સ્યાદિન્દ્રિયાણાં તદાત્મતામ્ ।
US-P16.022cd ગતા ધીસ્તાં હિ પશ્યઞ્ જ્ઞો દેહમાત્ર ઇવેક્ષ્યતે ॥

US-P16.023ab ક્ષણિકં હિ તદત્યર્થં ધર્મમાત્રં નિરન્તરમ્ ।
US-P16.023cd સાદૃશ્યાદ્ દીપવત્ તદ્ધીસ્તચ્છાન્તિઃ પુરુષાર્થતા ॥

US-P16.024ab સ્વાકારન્યાવભાસં ચ યેષાં રૂપાદિ વિદ્યતે ।
US-P16.024cd યેષાં નાસ્તિ તતશ્ચાન્યત્ પૂર્વાસંગતિરુચ્યતે ॥

US-P16.025ab બાહ્યાકારત્વતો જ્ઞપ્તેઃ સ્મૃત્યભાવઃ સદા ક્ષણાત્ ।
US-P16.025cd ક્ષણિકત્વાચ્ ચ સંસ્કારં નૈવાધત્તે ક્વચિત્ તુ ધીઃ ॥

US-P16.026ab આધારસ્યાપિ અસત્ત્વાચ્ ચ તુલ્યતાનિર્નિમિત્તતઃ ।
US-P16.026cd સ્થાને વા ક્ષણિકત્વસ્ય હાનં સ્યાન્ ન તદિષ્યતે ॥

US-P16.027ab શાન્તેશ્ચાયત્નસિદ્ધત્વાત્ સાધનોક્તિરનર્થિકા ।
US-P16.027cd એકૈકસ્મિન્ સમાપ્તત્વાચ્છાન્તેરન્યાનપેક્ષતા ॥

US-P16.028ab અપેક્ષા યદિ ભિન્નેઽપિ પરસંતાન ઇષ્યતામ્ ।
US-P16.028cd સર્વાર્થે ક્ષણિકે કસ્મિંસ્તથાપ્યન્યાનપેક્ષતા ॥

US-P16.029ab તુલ્યકાલસમુદ્ભૂતાવિતરેતરયોગિનૌ ।
US-P16.029cd યોગાચ્ ચ સંસ્કૃતો યસ્તુ સોઽન્યં હીક્ષિતુમર્હતિ ॥

US-P16.030ab મૃષાધ્યાસસ્તુ યત્ર સ્યાત્ તન્નાશસ્તત્ર નો મતઃ ।
US-P16.030cd સર્વનાશો ભવેદ્ યસ્ય મોક્ષઃ કસ્ય ફલં વદ ॥

US-P16.031ab અસ્તિ તાવત્ સ્વયં નામ જ્ઞાનં વાત્મન્યદેવ વા ।
US-P16.031cd ભાવાભાવજ્ઞતસ્તસ્ય નાભાવસ્ત્વધિગમ્યતે ॥

US-P16.032ab યેનાધિગમ્યતેઽભાવસ્તત્ સત્ સ્યાત્ તન્ ન ચેદ્ ભવેત્ ।
US-P16.032cd ભાવાભાવાનભિજ્ઞત્વં લોકસ્ય સ્યાન્ ન ચેષ્યતે ॥

US-P16.033ab સદસત્ સદસચ્ ચેતિ વિકલ્પાત્ પ્રાગ્ યદિષ્યતે ।
US-P16.033cd તદદ્વૈતં સમત્વાત્ તુ નિત્યં ચાન્યદ્ વિકલ્પિતાત્ ॥

US-P16.034ab વિકલ્પોદ્ભવતોઽસત્ત્વં સ્વપ્નદૃશ્યવદિષ્યતામ્ ।
US-P16.034cd દ્વૈતસ્ય પ્રાગસત્ત્વાચ્ ચ સદસત્ત્વાદિકલ્પનાત્ ॥

US-P16.035ab વાચારમ્ભણશાસ્ત્રાચ્ ચ વિકારાણાં હ્યભાવતા ।
US-P16.035cd મૃત્યોઃ સ મૃત્યુમિત્યાદેર્મમ મયેતિ ચ સ્મૃતેઃ ॥

US-P16.036ab વિશુદ્ધિશ્ચાત એવાસ્ય વિકલ્પાચ્ ચ વિલક્ષણાત્ ।
US-P16.036cd ઉપાદેયો ન હેયોઽત આત્મા નાન્યૈરકલ્પિતઃ ॥

US-P16.037ab અપ્રકાશો યથાદિત્યે નાસ્તિ જ્યોતિઃસ્વભાવતઃ ।
US-P16.037cd નિત્યબોધસ્વરૂપત્વાન્ નાજ્ઞાનં તદ્વદાત્મનિ ॥

US-P16.038ab તથાવિક્રિયરૂપત્વાન્ નાવસ્થાન્તરમાત્મનઃ ।
US-P16.038cd અવસ્થાન્તરવત્ત્વે હિ નાશોઽસ્ય સ્યાન્ ન સંશયઃ ॥

US-P16.039ab મોક્ષોઽવસ્થાન્તરં યસ્ય કૃતકઃ સ ચલો હ્યતઃ ।
US-P16.039cd ન સંયોગો વિયોગો વા મોક્ષો યુક્તઃ કથંચન ॥

US-P16.040ab સંયોગસ્યાપ્યનિત્યત્વાદ્ વિયોગસ્ય તથૈવ ચ ।
US-P16.040cd ગમનાગમને ચૈવ સ્વરૂપં તુ ન હીયતે ॥

US-P16.041ab સ્વરૂપસ્યાનિમિત્તત્વાત્ સનિમિત્તા હિ ચાપરે ।
US-P16.041cd અનુપાત્તં સ્વરૂપં હિ સ્વેનાત્યક્તં તથૈવ ચ ॥

US-P16.042ab સ્વરૂપત્વાન્ ન સર્વસ્ય ત્યક્તું શક્યો હ્યનન્યતઃ ।
US-P16.042cd ગૃહીતું વા તતો નિત્યોઽવિષયત્વાપૃથક્ત્વતઃ ॥

US-P16.043ab આત્માર્થત્વાચ્ ચ સર્વસ્ય નિત્ય આત્મૈવ કેવલઃ ।
US-P16.043cd ત્યજેત્ તસ્માત્ ક્રિયાઃ સર્વાઃ સાધનૈઃ સહ મોક્ષવિત્ ॥

US-P16.044ab આત્મલાભઃ પરો લાભ ઇતિ શાસ્ત્રોપપત્તયઃ ।
US-P16.044cd અલાભોઽન્યાત્મલાભસ્તુ ત્યજેત્ તસ્માદનાત્મતામ્ ॥

US-P16.045ab ગુણાનાં સમભાવસ્ય ભ્રંશો ન હ્યુપપદ્યતે ।
US-P16.045cd અવિદ્યાદેઃ પ્રસુપ્તત્વાન્ ન ચાન્યો હેતુરિષ્યતે ॥

US-P16.046ab ઇતરેતરહેતુત્વે પ્રવૃત્તિઃ સ્યાત્ સદા ન વા ।
US-P16.046cd નિયમો ન પ્રવૃત્તીનાં ગુણેષ્વાત્મનિ વા ભવેત્ ॥

US-P16.047ab વિશેષો મુક્તબદ્ધાનાં તાદર્થ્યે ચ ન યુજ્યતે ।

US-P16.047cd અર્થાર્થિનોશ્ચ સંબન્ધો નાર્થી જ્ઞો નેતરોઽપિ વા ॥

US-P16.048ab પ્રધાનસ્ય ચ પારાર્થ્યં પુરુષસ્યાવિકારતઃ ।
US-P16.048cd ન યુક્તં સંખ્યશાસ્ત્રેઽપિ વિકારેઽપિ ન યુજ્યતે ॥

US-P16.049ab સંબન્ધાનુપપત્તેશ્ચ પ્રકૃતેઃ પુરુષસ્ય ચ ।
US-P16.049cd મિથોઽયુક્તં તદર્થત્વં પ્રધાનસ્યાચિતિત્વતઃ ॥

US-P16.050ab ક્રિયોત્પત્તૌ વિનાશિત્વં જ્ઞાનમાત્રે ચ પૂર્વવત્ ।
US-P16.050cd નિર્મિત્તે ત્વનિર્મોક્ષઃ પ્રધાનસ્ય પ્રસજ્યતે ॥

US-P16.051ab ન પ્રકાશ્યં યથોષ્ણત્વં જ્ઞાનેનૈવં સુખાદયઃ ।
US-P16.051cd એકનીડત્વતોઽગ્રાહ્યાઃ સ્યુઃ કણાદાદિવર્તમનામ્ ॥

US-P16.052ab યુગપચ્ ચાસમેતત્વાત્ સુખવિજ્ઞાનયોરપિ ।
US-P16.052cd મનોયોગૈકહેતુત્વાદગ્રાહ્યત્વં સુખસ્ય ચ ॥

US-P16.053ab તથાન્યેષાં ચ ભિન્નત્વાદ્ યુગપજ્જન્મ નેષ્યતે ।
US-P16.053cd ગુણાનાં સમવેતત્વં જ્ઞાનં ચેન્ ન વિશેષણાત્ ॥

US-P16.054ab જ્ઞાનેનૈવ વિશેષ્યત્વાજ્ જ્ઞાનાપ્યત્વં સ્મૃતેશ્તથા ।
US-P16.054cd સુખં જ્ઞાતં મયેત્યેવં તવાજ્ઞાનાત્મકત્વતઃ ॥

US-P16.055ab સુખાદેર્નાત્મધર્મત્વમાત્મનસ્તેઽવિકારતઃ ।
US-P16.055cd ભેદાદન્યસ્ય કસ્માન્ ન મનસો વાઽવિશેષતઃ ॥

US-P16.056ab સ્યાન્ માલાપરિહાર્યા તુ જ્ઞાનં ચેજ્ જ્ઞેયતાં વ્રજેત્ ।
US-P16.056cd યુગપદ્ વાપિ ચોત્પત્તિરભ્યુપેતેઽન્ત ઇષ્યતે ॥

US-P16.057ab અનવસ્થાન્તરત્વાચ્ ચ બન્ધો નાત્મનિ વિદ્યતે ।
US-P16.057cd નાશુદ્ધિશ્ચાપ્યસઙ્ગત્વાદસઙ્ગો હીતિ ચ શ્રુતેઃ ॥

US-P16.058ab સૂક્ષ્મૈકાગોચારેભ્યશ્ ચ ન લિપ્યત ઇતિ શ્રુતેઃ ।
US-P16.058cd એવં તર્હિ ન મોક્ષોઽસ્તિ બન્ધાભાવાત્ કથંચન ॥

US-P16.059ab શાસ્ત્રાનર્થક્યમેવં સ્યાન્ ન બુદ્ધેર્ભ્રાન્તિરિષ્યતે ।
US-P16.059cd બન્ધો મોક્ષશ્ચ તન્નાશઃ સ યથોક્તો ન ચાન્યથા ॥

US-P16.060ab બોધાત્મજ્યોતિષા દીપ્તા બોધમાત્મનિ મન્યતે ।
US-P16.060cd બુદ્ધિર્નાન્યોઽસ્તિ બોદ્ધેતિ સેયં ભ્રાન્તિર્હિ ધીગતા ॥

US-P16.061ab બોધસ્યાત્મસ્વરૂપત્વાન્ નિત્યં તત્રોપચર્યતે ।
US-P16.061cd અવિવેકોઽપ્યનાદ્યોઽયં સંસારો નાન્ય ઇષ્યતે ॥

US-P16.062ab મોક્ષસ્તન્નાશ એવ સ્યાન્ નાન્યથાનુપપત્તિતઃ ।
US-P16.062cd યેષાં વસ્ત્વન્તરાપત્તિર્મોક્ષો નાશસ્તુ તૈર્મતઃ ॥

US-P16.063ab અવસ્થાન્તરમપ્યેવમવિકારાન્ ન યુજ્યતે ।
US-P16.063cd વિકારેઽવયવિત્વં સ્યાત્ તતો નાશો ઘટાદિવત્ ॥

US-P16.064ab તસ્માદ્ ભ્રાન્તિરતોઽન્યા હિ બન્ધમોક્ષાદિકલ્પનાઃ ।
US-P16.064cd સાંખ્યકાણાદબૌદ્ધાનાં મીમાંસાહતકલ્પનાઃ ॥

US-P16.065ab શાસ્ત્રયુક્તિવિરોધાત્ તા નાદર્તવ્યાઃ કદાચન ।
US-P16.065cd શક્યન્તે શતશો વક્તું દોષાસ્તાસાં સહસ્રશઃ ॥

US-P16.066ab અપિ નિન્દોપપત્તેશ્ચ યાન્યતોઽન્યાનિ ચેત્યતઃ ।
US-P16.066cd ત્યક્ત્વાતો હ્યન્યશાસ્ત્રોક્તીર્મતિં કુર્યાદ્ દૃઢાં બુધઃ ॥

US-P16.067ab શ્રદ્ધાભક્તી પુરસ્કૃત્ય હિત્વા સર્વમનાર્જવમ્ ।
US-P16.067cd વેદાન્તસ્યૈવ તત્ત્વાર્થે વ્યાસસ્યાપિ મતૌ તથા ॥

US-P16.068ab ઇતિ પ્રણુન્ના દ્વયવાદકલ્પના નિરાત્મવાદાશ્ચ તથા હિ યુક્તિતઃ ।
US-P16.068cd વ્યપેતશઙ્કાઃ પરવાદતઃ સ્થિરા મુમુક્ષવો જ્ઞાનપથે સ્યુરિત્યુત ॥

US-P16.069ab સ્વસાક્ષિકં જ્ઞાનમતીવ નિર્મલં વિકલ્પનાભ્યો વિપરીતમદ્વયમ્ ।
US-P16.069cd અવાપ્ય સમ્યગ્ યદિ નિશ્ચિતો ભવેન્ નિરન્વયો નિર્વૃતિમેતિ શાશ્વતીમ્ ॥

US-P16.070ab ઇદં રહસ્યં પરમં પરાયણં વ્યપેતદોષૈરભિમાનવર્જિતૈઃ ।
US-P16.070cd સમીક્ષ્ય કાર્યા મતિરાર્જવે સદા ન તત્ત્વદૃક્ સ્વાન્યમતિર્હિ કશ્ચન ॥

US-P16.071ab અનેકજન્માન્તરસંચિતૈર્નરો વિમુચ્યતેઽજ્ઞાનનિમિત્તપાતકૈઃ ।
US-P16.071cd ઇદં વિદિત્વા પરમં હિ પાવનં ન લિપ્યતે વ્યોમ ઇવેહ કર્મભિઃ ॥

US-P16.072ab પ્રશાન્તચિત્તાય જિતેન્દ્રિયાય ચ પ્રહીણદોષાય યથોક્તકારિણે ।
US-P16.072cd ગુણાન્વિતાયાનુગતાય સર્વદા પ્રદેયમેતત્ સતતં મુમુક્ષવે ॥

US-P16.073ab પરસ્ય દેહે ન યથાભિમાનિતા પરસ્ય તદ્વત્ પરમાર્થમીક્ષ્ય ચ ।
US-P16.073cd ઇદં હિ વિજ્ઞાનમતીવ નિર્મલં સમ્પ્રાપ્ય મુક્તોઽથ ભવેચ્ ચ સર્વતઃ ॥

US-P16.074ab ન હીહ લાભોઽભ્યધિકોઽસ્તિ કશ્ચન સ્વરૂપલાભાત્ સ ઇતો હિ નાન્યતઃ ।
US-P16.074cd ન દેયમૈન્દ્રાદપિ રાજતોઽધિકં સ્વરૂપલાભં ત્વપરીક્ષ્ય યત્નતઃ ॥

US-P17.001ab આત્મા જ્ઞેયઃ પરો હ્યાત્મા યસ્માદન્યન્ ન વિદ્યતે ।
US-P17.001cd સર્વજ્ઞઃ સર્વદૃક્ શુદ્ધસ્તસ્મૈ જ્ઞેયાત્મને નમઃ ॥

US-P17.002ab પદવાક્યપ્રમાણજ્ઞૈર્દીપભૂતૈઃ પ્રકાશિતં ।
US-P17.002cd બ્રહ્મ વેદરહસ્યં યૈસ્તાન્ નિત્યં પ્રણતોઽસ્મ્યહમ્ ॥

US-P17.003ab યદ્વાક્સૂર્યાંશુસમ્પાતપ્રણષ્ટધ્વાન્તકલ્મષઃ ।
US-P17.003cd પ્રણમ્ય તાન્ ગુરૂન્ વક્ષ્યે બ્રહ્મવિદ્યાવિનિશ્ચયમ્ ॥

US-P17.004ab આત્મલાભાત્ પરો નાચો લાભઃ કશ્ચન વિદ્યતે ।
US-P17.004cd યદર્થા વેદવાદાશ્ચ સ્માર્તાશ્ચાપિ તુ યાઃ ક્રિયાઃ ॥

US-P17.005ab આત્માર્થોઽપિ હિ યો લાભઃ સુખાયેષ્ટો વિપર્યયઃ ।
US-P17.005cd આત્મલાભઃ પરઃ પ્રોક્તો નિત્યત્વાદ્ બ્રહ્મવેદિભિઃ ॥

US-P17.006ab સ્વયં લબ્ધસ્વભાવત્વા લાભસ્તસ્ય ન ચાયથઃ ।
US-P17.006cd અન્યાપેક્ષસ્તુ યો લાભઃ સોઽન્યદૃષ્ટિસમુદ્ભવઃ ॥

US-P17.007ab અન્યદૃષ્ટિસ્ત્વવિદ્યા સ્યાત્ તન્નાશો મોક્ષ ઉચ્યતે ।
US-P17.007cd જ્ઞાનેનૈવ તુ સોઽપિ સ્યાદ્ વિરોધિત્વાન્ ન કર્મણા ॥

US-P17.008ab કર્મકાર્યસ્ત્વનિત્યઃ સ્યાદવિદ્યાકામકારણઃ ।
US-P17.008cd પ્રમાણં વેદ એવાત્ર જ્ઞાનસ્યાધિગમે સ્મૃતઃ ॥

US-P17.009ab જ્ઞાનૈકાર્થપરત્વાત્ તં વાક્યમેકં તતો વિદુઃ ।
US-P17.009cd એકત્વં હ્યાત્મનો જ્ઞેયં વાક્યાર્થપ્રતિપત્તિતઃ ॥

US-P17.010ab વાચ્યભેદાત્ તુ તદ્ભેદઃ કલ્પ્યો વાચ્યોઽપિ તચ્છ્રુતેઃ ।
US-P17.010cd ત્રયં ત્વેતત્ તતઃ પ્રોક્તં રૂપં નામ ચ કર્મ ચ ॥

US-P17.011ab અસદેતત્ ત્રયં તસ્માદન્યોન્યેન હિ કલ્પિતમ્ ।
US-P17.011cd કૃતો વર્ણા થતા શબ્દાચ્છ્રુતોઽન્યત્ર ધિયા બહિઃ ॥

US-P17.012ab દૃષ્ટં ચાપિ યથારૂપં બુદ્ધેઃ શબ્દાય કલ્પતે ।
US-P17.012cd એવમેતજ્ જગત્ સર્વં ભ્રાન્તિબુદ્ધિવિકલ્પિતમ્ ॥

US-P17.013ab અસદેતત્ તતો યુક્તં સચ્ચિન્માત્રં ન કલ્પિતમ્ ।
US-P17.013cd વેદશ્ચાપિ સ એવાદ્યો વેદ્યશ્ચાન્યસ્તુ કલ્પિતઃ ॥

US-P17.014ab યેન વેત્તિ સ વેદઃ સ્યાત્ સ્વપ્ને સર્વં તુ માયયા ।

US-P17.014cd ચેન પશ્યતિ તચ્ ચક્ષુઃ શ◌ૃણોતિ શ્રોત્રમુચ્યતે ॥

US-P17.015ab ચેન સ્વપ્નગતો વક્તિ સા વાગ્ ઘ્રાણં તથૈવ ચ ।
US-P17.015cd રસનસ્પર્શને ચૈવ મનશ્ચાન્યત્ તથેન્દ્રિયમ્ ॥

US-P17.016ab કલ્પ્યોપાધિભિરેવૈતદ્ ભિનં જ્ઞાનમનેકધા ।
US-P17.016cd આધિભેદાદ્ યથ ભેદો મણેરેકસ્ય જાયતે ॥

US-P17.017ab જાગ્રતશ્ચ તથા ભેદો જ્ઞાનસ્યાસ્ય વિકલ્પિતઃ ।
US-P17.017cd બુધ્દ્ધિસ્થં વ્યાકરોત્યર્થં ભ્રાન્ત્યા તૃષ્ણોદ્ભવક્રિયઃ ॥

US-P17.018ab સ્વપ્ને યદ્વત્ પ્રબોધે ચ બહિશ્ચાન્તસ્તથૈવ ચ ।
US-P17.018cd આલેખ્યાધ્યયને યદ્વત્ તદન્યોન્યધિયોદ્ભવમ્ ॥

US-P17.019ab યદાયં કલ્પયેદ્ ભેદં તત્કામઃ સન્ યથાક્રતુઃ ।
US-P17.019cd યત્કામસ્તત્ક્રતુર્ભૂત્વા કૃતં યત્ તત્ પ્રપદ્યતે ॥

US-P17.020ab અવિદ્યાપ્રભવં સર્વમસત્ તસ્માદિદં જગત્ ।
US-P17.020cd તદ્વતા સૃશ્યતે યસ્માત્ સુષુપ્તે ન ચ ગ્રહ્યતે ॥

US-P17.021ab વિદ્યાવિદ્યે શ્રુતિપ્રોક્તે એકત્વાન્યધિયૌ ગિ નઃ ।
US-P17.021cd તસ્માત્ સર્વપ્રયત્નેન શાસ્ત્રે વિદ્યા વિધીયતે ॥

US-P17.022ab ચિત્તે હ્યાદર્શવદ્ યસ્માચ્છુધ્દ્ધે વિદ્યા પ્રકાશતે ।
US-P17.022cd યમૈર્નિત્યૈશ્ચ યજ્ઞૈશ્ચ તપોભિસ્તસ્ય શોધનમ્ ॥

US-P17.023ab શારીરાદિતપઃ કુર્યાત્ તદ્વિશુદ્ધ્યર્થમુત્તમમ્ ।
US-P17.023cd મનાદિસમાધાનં તત્તદ્દેહવિશોષણમ્ ॥

US-P17.024ab દૃષ્ટં જાગરિતં વિદ્યાત્ સ્મૃતં સ્વપ્નં તદેવ તુ ।
US-P17.024cd સુષુપ્તં તદભાવં ચ સ્વમાત્માનં પરં પદમ્ ॥

US-P17.025ab સુષુપ્તાખ્યં તમોઽજ્ઞાનં બીજં સ્વપ્નપ્રબોધયોઃ ।
US-P17.025cd સ્વાત્મબોધપ્રદગ્ધં સ્યાદ્ બીજં દગ્ધં યથાભવમ્ ॥

US-P17.026ab તદેવૈકં ત્રિધા જ્ઞેયં માયાબીજં પુનઃ ક્રમાત્ ।
US-P17.026cd માયાવ્યાત્માવિકારોઽપિ બહુધૈલો જલાર્કવત્ ॥

US-P17.027ab બીજં ચૈકં યથા ભિન્નં પ્રાણસ્વપ્નાદિભિસ્થતા ।
US-P17.027cd સ્વપ્નજાગ્રચ્છરીએષુ તદ્વચ્ ચાત્મા જલેન્દુવત્ ॥

US-P17.028ab માયાહસ્તિનમારુહ્ય માયાવ્યેકો યથા વ્રજેત્ ।
US-P17.028cd આગચ્છંસ્તદ્વદેવાત્મા પ્રાણસ્વપ્નાદિગોઽચલઃ ॥

US-P17.029ab ન હસ્તી ન તદારૂઢો માયાવ્યન્યો યથા સ્થિતઃ ।
US-P17.029cd ન પ્રાણાદિ ન તદ્દ્રષ્ટા તથા જ્ઞોઽન્યઃ સદા દૃશિઃ ।
US-P17.030ab અબદ્ધચક્ષુષો નાસ્તિ માયા માયાવિનોઽપિ વા ।
US-P17.030cd બદ્ધાક્ષસ્યૈવ સા માયામાયાવ્યેવ તતો ભવેત્ ॥

US-P17.031ab સાક્ષાદેવ સ વિજ્ઞેયઃ સાક્ષાદાત્મેતિ ચ શ્રુતેઃ ।
US-P17.031cd ભિદ્યતે હૃદયગ્રન્થિર્ન ચેદિત્યાદિતઃ શ્રુતેઃ ॥

US-P17.032ab અશબ્દાદિત્વતો નાસ્ય ગ્રહણં ચેન્દ્રિયૈર્ભવેત્ ।
US-P17.032cd સુખાદિભ્યસ્તથાન્યત્વદ્ બુદ્ધ્યા વાપિ કથં ભવેત્ ॥

US-P17.033ab અદૃશ્યોઽપિ યથા રાહુશ્ચન્દ્રે બિમ્બં યથામ્ભસિ ।
US-P17.033cd સર્વગોઽપિ તથૈવાત્મા બુદ્ધાવેવ સ ગૃહ્યતે ॥

US-P17.034ab ભાનોર્બિમ્બં યથા ચૌષ્ણ્યં જલે દૃષ્ટં ન ચામ્ભસઃ ।
US-P17.034cd બુદ્ધૌ બોધો ન તદ્ધર્મસ્તથૈવ સ્યાદ્ વિધર્મતઃ ॥

US-P17.035ab ચક્ષુર્યુક્તા ધિયો વૃત્તિર્યા તાં તશ્યન્નલુપ્તદૃક્ ।
US-P17.035cd દૃષ્ટેર્દ્રષ્ટા ભવેદાત્મા શ્રુતેઃ શ્રોતા તથા શ્રુતેઃ ॥

US-P17.036ab કેવલાં મનસો વૃત્તિં પશ્યન્ મન્તા મતેરજઃ ।
US-P17.036cd વિજ્ઞાતાલુપ્તશક્તિત્વાત્ તથા શાસ્ત્રં ન હીત્યતઃ ॥

US-P17.037ab ધ્યાયતીત્યવિકારિત્વં તથા લેલાયતીત્યપિ ।
US-P17.037cd અત્ર સ્તેનેતિ શુદ્ધત્વં તથાનન્વાગતં શ્રુતેઃ ॥

US-P17.038ab શક્ત્યલોપાત્ સુષુપ્તે જ્ઞસ્થતા બોધેઽવિકારતઃ ।
US-P17.038cd જ્ઞેયસ્યૈવ વિશેષસ્તુ યત્ર વેતિ શ્રુતેર્મતઃ ॥

US-P17.039ab વ્યવધાનાદ્ ધિ પારોક્ષ્યં લોકદૃષ્ટેરનાત્મનઃ ।
US-P17.039cd દૃષ્ટેરાત્મસ્વરૂપત્વાત્ પ્રત્યક્ષં બ્રહ્મ તત્ સ્મૃતમ્ ॥

US-P17.040ab ન હિ દીપાન્તરાપેક્ષા યદ્વદ્ દીપપ્રકાશને ।
US-P17.040cd બોધસ્યાત્મસ્વરૂપત્વાન્ ન બોધોઽન્યસ્તથેષ્યતે ॥

US-P17.041ab વિષયત્વં વિકારિત્વં નાનાત્વં વા ન હીષ્યતે ।
US-P17.041cd ન હેયો નાપ્યુપાદેય આત્મા નાન્યેન વા તતઃ ॥

US-P17.042ab સબાહ્યાભ્યન્તરોઽજીર્ણો જન્મમૃત્યુજરાતિગઃ ।
US-P17.042cd અહમાત્મેતિ યો વેત્તિ કુતો ન્વેવ બિભેતિ સઃ ॥

US-P17.043ab પ્રગેવૈતદ્વિધેઃ કર્મ વર્ણિત્વાદેરપોહનાત્ ।
US-P17.043cd તદસ્થૂલાદિશાસ્ત્રેભ્યસ્તત્ ત્વમેવેતિ નિશ્ચયાત્ ॥

US-P17.044ab પૂર્વદેહપરિત્યાગે જાત્યાદીનાં પ્રહાણતઃ ।
US-P17.044cd દેહસ્યૈવ તુ જાત્યાદિસ્તસ્યાપ્યેવં હ્યનાત્મતા ॥

US-P17.045ab મમાહં ચેત્યતોઽવિદ્યા શરીરાદિષ્વનાત્મસુ ।
US-P17.045cd આત્મજ્ઞાનેન હેયા સ્યાદસુરાણામિતિ શ્રુતેઃ ॥

US-P17.046ab દશાહાશૌચકાર્યાણાં પારિવ્રાજ્યે નિવર્તનમ્ ।
US-P17.046cd યથા જ્ઞાનસ્ય સમ્પ્રાપ્તૌ તદ્વજ્ જાત્યાદિકર્મણામ્ ॥

US-P17.047ab યત્કામસ્તત્ક્રતુર્ભૂત્વા કૃતં ત્વજ્ઞઃ પ્રપદ્યતે ।
US-P17.047cd યદા સ્વાત્મદૃશઃ કામાઃ પ્રમુચ્યન્તેઽમૃતસ્તદા ॥

US-P17.048ab આત્મરૂપવિધેઃ કાર્યં ક્રિયાદિભ્યો નિવર્તનમ્ ।
US-P17.048cd ન સાધ્યં સાધનં વાત્મા નિત્યતૃપ્તઃ શ્રુતેર્મતઃ ॥

US-P17.049ab ઉત્પાદ્યાપ્યવિકાર્યાણિ સંસ્કાર્યં ચ ક્રિયાફલમ્ ।
US-P17.049cd નાતોઽન્યત્ કર્મણઃ કર્યં ત્યજેત્ તસ્માત્ સસાધનમ્ ॥

US-P17.050ab તાપાન્તત્વાદનિત્યત્વાદાત્માર્થત્વાચ્ ચ યા બહિઃ ।
US-P17.050cd સંહૃત્યાત્મનિ તાં પ્રીતિં સત્યાર્થી ગુરુમાશ્રયેત્ ॥

US-P17.051ab શાન્તં પ્રાજ્ઞં તથા મુક્તં નિષ્ક્રિયં બ્રહ્મણિ સ્થિતમ્ ।
US-P17.051cd શ્રુતેરાચાર્યવાન્ વેદ તદ્ વિદ્ધીતિ સ્મૃતેસ્તથા ॥

US-P17.052ab સ ગુરુસ્તારયેદ્ યુક્તં શિષ્યં શિષ્યગુણાન્વિતમ્ ।
US-P17.052cd બ્રહ્મવિદ્યાપ્લવેનાશુ સ્વાન્તધ્વાન્તમહોદધિમ્ ॥

US-P17.053ab દૃષ્ટિઃ સ્પૃષ્ટિઃ શ્રુતિર્ઘ્રાતિર્મતિર્વિજ્ઞાતિરેવ ચ ।
US-P17.053cd શક્તયોઽન્યાશ્ચ ભિદ્યન્તે ચિદ્રૂપત્વેઽપ્યુપાધિભિઃ ॥

US-P17.054ab અપાયોદ્ભૂતિહીનાભિર્નિત્યં દીપ્યન્ રવિર્યથા ।
US-P17.054cd સર્વગઃ સર્વદૃક્ શુદ્ધઃ સર્વં જાનાતિ સર્વદા ॥

US-P17.055ab અન્યદૃષ્ટિઃ શરીરસ્થસ્તાવન્માત્રો હ્યવિદ્યયા ।
US-P17.055cd જલેન્દ્વાદ્યુપમભિસ્તુ તદ્ધર્મા ચ વિભાવ્યતે ॥

US-P17.056ab દૃષ્ટ્વા બાહ્યં નિમીલ્યાથ સ્મૃત્વા તત્ પ્રવિહાય ચ ।
US-P17.056cd અથોન્મીલ્યાત્મનો દૃષ્ટિં બ્રહ્મ પ્રાપ્નોત્યનધ્વગઃ ॥

US-P17.057ab પ્રાણાદ્યેવં ત્રિકં હિત્વઃ તીર્ણોઽજ્ઞાનમહોદધિમ્ ।
US-P17.057cd સ્વાત્મસ્થો નિર્ગુણઃ શુદ્ધો બુદ્ધો મુક્તઃ સ્વતો હિ સઃ ॥

US-P17.058ab અજોઽહં ચામરોઽમૃત્યુરજરોઽભય એવ ચ ।
US-P17.058cd સર્વજ્ઞઃ સર્વદૃક્ શુદ્ધ ઇતિ બુદ્ધો ન જાયતે ॥

US-P17.059ab પૂર્વોક્તં યત્ તમોબીજં તન્ નાસ્તીતિ વિનિશ્ચયઃ ।
US-P17.059cd તદ્ભાવે કુતો જન્મ બ્રહ્મૈકત્વં વિજાનતઃ ॥

US-P17.060ab ક્ષીરાત્ સર્પિર્યથોદ્ધૃત્ય ક્ષિપ્તં તસ્મિન્ ન પૂર્વવત્ ।
US-P17.060cd બુદ્ધ્યાદેર્જ્ઞસ્તથાસત્યાન્ ન દેહી પૂર્વવદ્ ભવેત્ ॥

US-P17.061ab સત્યં જ્ઞાનમનન્તં ચ રસાદેઃ પઞ્ચકાત્ પરમ્ ।
US-P17.061cd સ્યામદૃશ્યાદિશાસ્ત્રોક્તમહં બ્રહ્મેતિ નિર્ભયઃ ॥

US-P17.062ab યસ્માદ્ ભીતાઃ પ્રવર્તન્તે વાગ્મનઃપાવકાદયઃ ।
US-P17.062cd તદાત્માનન્દતત્ત્વજ્ઞો ન બિભેતિ કુતશ્ચન ॥

US-P17.063ab નામાદિભ્યઃ પરે ભૂમ્નિ સ્વારાજ્યે ચેત્ સ્થિતોઽદ્વયે ।
US-P17.063cd પ્રણમેત્ કં તદાત્મજ્ઞો ન કાર્યં કર્મણા તદા ॥

US-P17.064ab વિરાડ્ વૈશ્વાનરો બાહ્યઃ સ્મરન્નન્તઃ પ્રજાપતિઃ ।
US-P17.064cd પ્રવિલીને તુ સર્વસ્મિન્ પ્રાજ્ઞોઽવ્યાકૃતમુચ્યતે ॥

US-P17.065ab વાચારમ્ભણમાત્રત્વાત્ સુષુપ્તાદિત્રિકં ત્વસત્ ।
US-P17.065cd સત્યો જ્ઞશ્ચાહમિત્યેવં સત્યસન્ધો વિમુચ્યતે ॥

US-P17.066ab ભારૂપત્વાદ્ યથા ભાનોર્નાહોરાત્રે તથૈવ તુ ।
US-P17.066cd જ્ઞાનાજ્ઞાને ન મે સ્યાતાં ચિદ્રૂપત્વાવિશેષતઃ ॥

US-P17.067ab શાસ્ત્રસ્યાનતિશઙ્ક્યત્વાદ્ બ્રહ્મૈવ સ્યામહં સદા ।
US-P17.067cd બ્રહ્મણો મે ન હેયં સ્યાદ્ ગ્રાહ્યં વેતિ ચ સંસ્મરેત્ ॥

US-P17.068ab અહમેવ ચ ભૂતેષુ સર્વેષ્વેકો નભો યથા ॥

US-P17.068cd મયિ સર્વાણિ ભૂતાનિ પશ્યન્નેવં ન જાયતે ॥

US-P17.069ab ન બાહ્યં મધ્યતો વાન્તર્વિદ્યતેઽન્યત્ સ્વતઃ ક્વચિત્ ।
US-P17.069cd અબાહ્યાન્તઃશ્રુતેઃ કિંચિત્ તસ્માચ્છુદ્ધઃ સ્વયંપ્રભઃ ॥

US-P17.070ab નેતિનેત્યાદિશાસ્ત્રેભ્યઃ પ્રપઞ્ચોપશમોઽદ્વયઃ ।
US-P17.070cd અવિજ્ઞાતાદિશાસ્ત્રાચ્ચ નૈવ જ્ઞેયો હ્યતોઽન્યથા ॥

US-P17.071ab સર્વસ્યાત્માહમેવેતિ બ્રહ્મ ચેદ્ વિદિતં પરમ્ ।
US-P17.071cd સ આત્મા સર્વભૂતાનામાત્મા હ્યેષામિતિ શ્રુતેઃ ॥

US-P17.072ab જિવશ્ચેત્ પરમાત્માનં સ્વાત્માનં દેવમઞ્જસા ।
US-P17.072cd દેવોપાસ્યઃ સ દેવાનાં પશુત્વાચ્ ચ નિવર્તતે ॥

US-P17.073ab અહમેવ સદાત્મજ્ઞઃ શૂન્યસ્ત્વન્યૈર્યથામ્બરમ્ ।
US-P17.073cd ઇત્યેવં સત્યસંધત્વાદસદ્ધાતા ન બધ્યતે ॥

US-P17.074ab કૃપણાસ્તેઽન્યથૈવાતો વિદુર્બ્રહ્મ પરં હિ યે ।
US-P17.074cd સ્વરાડ્ યોઽનન્યદૃક્ સ્વસ્થસ્તસ્ય દેવા અસન્ વશે ॥

US-P17.075ab હિત્વા જાત્યાદિસંબન્ધં વાચોઽન્યાઃ સહ કર્મભિઃ ।
US-P17.075cd ઓમિત્યેવં સ્વમાત્માનં સર્વં શુદ્ધં પ્રપદ્યથ ॥

US-P17.076ab સેતું સર્વવ્યવસ્થાનામહોરાત્રાદિવર્જિતમ્ ।
US-P17.076cd તિર્યગૂર્ધ્વમધઃ સર્વં સકૃજ્જ્યોતિરનામયમ્ ॥

US-P17.077ab ધર્માધર્મવિનિર્મુક્તં ભૂતભવ્યાત્ કૃતાકૃતાત્ ।
US-P17.077cd સ્વમાત્માનં પરં વિદ્યાદ્ વિમુક્તં સર્વબન્ધનૈઃ ॥

US-P17.078ab અકુર્વન્ સર્વકૃચ્છુદ્ધસ્તિષ્ઠન્નત્યેતિ ધાવતઃ ।
US-P17.078cd માયયા સર્વશક્તિત્વાદજઃ સન્ બનુધા મતઃ ॥

US-P17.079ab રાજવત્ સાક્ષિમાત્રત્વાત્ સાંનિધ્યાદ્ ભ્રામકો યથા ।
US-P17.079cd ભ્રામયઞ્ જગદાત્માહં નિષ્ક્રિયો ઽકારકોઽદ્વયઃ ॥

US-P17.080ab નિગુણં સિષ્કિયં નિત્યં નિર્દ્વન્દ્વં યન્ નિરામયમ્ ।
US-P17.080cd શુદ્ધં બુદ્ધં તથા મુક્તં તદ્ બ્રહ્માસ્મીતિ ધારયેત્ ॥

US-P17.081ab બન્ધં સોક્ષં ચ સર્વં યત ઇદમુભયં હેયમેકં દ્વયં ચ ।
US-P17.081cd જ્ઞેયાજ્ઞેયાભ્યતીતં પરમમધિગતં તત્ત્વમેકં વિશુદ્ધમ્ ।
US-P17.081ef વિજ્ઞાયૈતદ્ યથાવચ્છ્રુતિમુનિગદિતં શોકમોહાવતીતઃ ।
US-P17.081gh સર્વજ્ઞઃ સર્વકૃત્ સ્યાદ્ ભવભયરહિતો બ્રાહ્મણોઽવાપ્તકૃત્યઃ ॥

US-P17.082ab ન સ્વયં સ્વસ્ય નાન્યશ્ચ નાન્યસ્યાત્મા ચ હેયગઃ ।
US-P17.082cd ઉપાદેયો ન ચાપ્યેવમિતિ સમ્યગ્મતિઃ સ્મૃતા ॥

US-P17.083ab આત્મપ્રત્યાયિકા હ્યેષા સર્વવેદાન્તગોચરા ।
US-P17.083cd જ્ઞાત્વૈતાં હિ વિમુચ્યન્તે સર્વસંસારબન્ધનૈઃ ॥

US-P17.084ab રહસ્યં સર્વવેદાનાં દેવાનાં ચાપિ યત્ પરમ્ ।
US-P17.084cd પવિત્રં પરમં હ્યેતત્ તદેતત્ સમ્પ્રકાશિતમ્ ॥

US-P17.085ab નૈતદ્ દેયમશાન્તાય રહસ્યં જ્ઞાનમુત્તમમ્ ।
US-P17.085cd વિરક્તાય પ્રદાતવ્યં શિષ્યાયાનુગતાય ચ ॥

US-P17.086ab દદતશ્ચાત્મનો જ્ઞાનં નિષ્ક્રિયોઽન્યો ન વિદ્યતે ।
US-P17.086cd જ્ઞાનમિચ્છન્ ભવેત્ તસ્માદ્ યુક્તઃ શિષ્યગુણૈઃ સદા ॥

US-P17.087ab જ્ઞાનં જ્ઞેયં તથા જ્ઞાતા યસ્માદન્યન્ ન વિદ્યતે ।
US-P17.087cd સર્વજ્ઞઃ સર્વશક્તિર્યસ્તસ્મૈ જ્ઞાનાત્મને નમઃ ॥

US-P17.088ab વિદ્યયા તારિતાઃ સ્મો યૈર્જન્મમૃત્યુમહોદધિમ્ ।
US-P17.088cd સર્વજ્ઞેભ્યો નમસ્તેભ્યો ગુરુભ્યોઽજ્ઞાનસંકુલં ॥

US-P18.001ab યેનાત્મના વિલીયન્ત ઉદ્ભવન્તિ ચ વૃત્તયઃ ।
US-P18.001cd નિત્યાવગતયે તસ્મૈ નમો ધીપ્રત્યયાત્મને ॥

US-P18.002ab પ્રમથ્ય વજ્રોપમયુક્તિસંભૃતૈઃ શ્રુતેરરાતીઞ્ શતશો વચોઽસિભિઃ ।
US-P18.002cd રરક્ષ વેદાર્થિનિધિં વિશાલધીર્નમો યતીન્દ્રિયાય ગુરોર્ગરીયસે ॥

US-P18.003ab નિત્યમુક્તઃ સદેવાસ્મીત્યેવં ચેન્ ન ભવેન્ મતિઃ ।
US-P18.003cd કિમર્થં શ્રાવયત્યેવં માતૃવચ્છ્રુતિરાદૃતા ॥

US-P18.004ab સિદ્ધાદેવાહમિત્યસ્માદ્ યુષ્મદ્ધર્મો નિષિધ્યતે ।
US-P18.004cd રજ્જ્વામિવાહિધીર્યુક્ત્યા તત્ ત્વમિત્યાદિશાસનૈઃ ॥

US-P18.005ab શાસ્ત્રપ્રામણ્યતો જ્ઞેયા ધર્માદેરસ્તિતા યથા ।
US-P18.005cd વિષાપોહો યથા ધ્યાનાદ્ હ્નુતિઃ સ્યાત્ પાપ્મનસ્તથા ॥

US-P18.006ab સદ્ બ્રહ્માહં કરોમીતિ પ્રત્યયાવાત્મસાક્ષિકૌ ।
US-P18.006cd તયોરજ્ઞાનજસ્યૈવ ત્યાગો યુક્તતરો મતઃ ॥

US-P18.007ab સદસ્મીતિ પ્રમાણોત્થા ધીરન્યા તન્નિબોદ્ભવા ।
US-P18.007cd પ્રત્યક્ષાદિનિભા વાપિ બાધ્યતે દિગ્ભ્રમાદિવત્ ॥

US-P18.008ab કર્તા ભોક્તેતિ યચ્છાસ્ત્રં લોકબુદ્ધ્યનુવાદિ તત્ ।
US-P18.008cd સદસ્મીતિ શ્રુતેર્જાતા બાધ્યતેઽનિત્યૈતયૈવ ધીઃ ॥

US-P18.009ab સદેવ ત્વમસીત્યુક્તે નાત્મનો મુક્તતાં સ્થિરામ્ ।
US-P18.009cd પ્રપદ્યતે પ્રસંચક્ષામતો યુક્ત્યાનુચિન્તયેત્ ॥

US-P18.010ab સકૃદુક્તં ન ગૃહ્ણાતિ વાક્યાર્થજ્ઞોઽપિ યો ભવેત્ ।
US-P18.010cd અપેક્ષતેઽત એવાન્યદવોચામ દ્વયં હિ તત્ ॥

US-P18.011ab નિયોગોઽપ્રતિપન્નત્વાત્ કર્મણાં સ યથા ભવેત્ ।
US-P18.011cd અવિરુદ્ધો ભવેત્ તાવદ્ યાવત્ સંવેદ્યતાદૃઢા ॥

US-P18.012ab ચેષ્ટિતં ચ તથા મિથ્યા સ્વચ્છન્દઃ પ્રતિપદ્યતે ।
US-P18.012cd પ્રસંખ્યાનમતઃ કાર્યં યાવદાત્માનુભૂયતે ॥

US-P18.013ab સદસ્મીતિ ચ વિજ્ઞાનમક્ષજો બાધતે ધ્રુવમ્ ।
US-P18.013cd શબ્દોત્થં દૃઢસંસ્કારો દોષૈશ્ચાકૃષ્યતે બહિઃ ॥

US-P18.014ab શ્રુતાનુમાનજન્માનૌ સામાન્યવિષયૌ યતઃ ।
US-P18.014cd પ્રત્યયાવક્ષજોઽવશ્યં વીશેષાર્થો નિવારયેત્ ॥

US-P18.015ab વાક્યાર્થપ્રત્યયી કશ્ચિન્ નિર્દુઃખો નોપલભ્યતે ।
US-P18.015cd યદિ વા દૃશ્યતે કશ્ચિદ્ વાક્યાર્થશ્રુતિમાત્રતઃ ॥

US-P18.016ab નિર્દુઃખોઽતીતદેહેષુ કૃતભાવોઽનુમીયતે ।
US-P18.016cd ચર્યા નોઽશાસ્ત્રસંવેદ્યા સ્યાદનિષ્ટં તથા સતિ ॥

US-P18.017ab સદસીતિ ફલં ચોક્ત્વા વિધેયં સાધનં યતઃ ।
US-P18.017cd ન તદન્યત્ પ્રસંખ્યાનાત્ પ્રસિદ્ધાર્થમિહેષ્યતે ॥

US-P18.018ab તસ્માદનુભવાયૈવ પ્રસંચક્ષીત યત્નતઃ ।
US-P18.018cd ત્યજન્ સાધનતત્સાધ્યવિરુદ્ધં શમનાદિમાન્ ॥

US-P18.019ab નૈતદેવં રહસ્યાનાં નેતિનેત્યવસાનતઃ ।
US-P18.019cd ક્રિયાસાધ્યં પુરા શ્રાવ્યં ન મોક્ષો નિત્યસિદ્ધતઃ ॥

US-P18.020ab પુત્રદુઃખં યથાધ્યસ્તં નિત્યાદુઃખે સ્વ આત્મનિ ।
US-P18.020cd અહંકર્ત્રા તથાધ્યસ્તં પિત્રાદુઃખે સ્વ આત્મનિ ॥

US-P18.021ab સોઽધ્યાસો નેતિ નેતીતિ પ્રાપ્તવત્ પ્રતિષિધ્યતે ।

US-P18.021cd ભૂયોऽધ્યાસવિધિઃ કશ્ચિત્ કુતશ્ચિન્ નોપપદ્યતે ॥

US-P18.022ab આત્મનીહ યથાધ્યાસઃ પ્રતિષેધસ્તથૈવ ચ ।
US-P18.022cd મલાધ્યાસનિષેધૌ ખે ક્રિયેતે ચ યથાબુધૈઃ ॥

US-P18.023ab પ્રાપ્તશ્ચેત્ પ્રતિષિધ્યેત મોક્ષોऽનિત્યો ભવેદ્ ધ્રુવમ્ ।
US-P18.023cd અતોऽપ્રાપ્તનિષેધોऽયં દિવ્યગ્નિચયનાદિવત્ ॥

US-P18.024ab સંભાવ્યો ગોચરે શબ્દઃ પ્રત્યયો વા ન ચાન્યથા ।
US-P18.024cd ન સંભાવ્યૌ તદાત્મત્વાદહંકર્તુસ્તથૈવ ચ ॥

US-P18.025ab અહંકર્ત્રાત્મનિ ન્યસ્તં ચૈતન્યે કર્તૃતાદિ યત્ ।
US-P18.025cd નેતિ નેતીતિ તત્ સર્વં સાહંકર્ત્રા નિષિધ્યતે ॥

US-P18.026ab ઉપલબ્ધિઃ સ્વયંજ્યોતિર્દૃશિઃ પ્રત્યક્ષદક્રિયઃ ।
US-P18.026cd સાક્ષાત્ સર્વાનતરઃ સાક્ષી ચેતા નિત્યોऽગુણોऽદ્વયઃ ॥

US-P18.027ab સંનિધૌ સર્વદા તસ્ય સ્યાત્ તદાભોऽભિમાનકૃત્ ।
US-P18.027cd આત્માત્મીયં દ્વયં ચાતઃ સ્યાદહંમમગોચરઃ ॥

US-P18.028ab જાતિકર્માદિમત્ત્વાદ્ ધિ તસ્મિન્ શબ્દસ્ત્વહંકૃતિ ।
US-P18.028cd ન કશ્ચિદ્ વર્તતે શબ્દસ્તદભાવાત્ સ્વ આત્મનિ ॥

US-P18.029ab આભાસો યત્ર તત્રૈવ શબ્દાઃ પ્રત્યગ્દૃશિં સ્થિતાઃ ।
US-P18.029cd લક્ષયેયુર્ન સાક્ષાત્ તમભિદધ્યુઃ કથંચન ॥

US-P18.030ab નહ્યજાત્યાદિમાન્ કશ્ચિદર્થઃ શબ્દૈર્નિરૂપ્યતે ।
US-P18.030cd આત્માભાસો યતોऽહંકૃદાત્મશબ્દૈસ્તથોચ્યતે ॥

US-P18.031ab ઉલ્મુકાદૌ યથાગ્ન્યર્થાઃ પરાર્થત્વાન્ ન ચાઞ્જસા ।
US-P18.031cd મુખાદન્યો મુખાભાસો યથાદર્શાનુકારતઃ ॥

US-P18.032ab આભાસાન્ મુખમપ્યેવમાદર્શાનુવર્તનાત્ ।
US-P18.032cd અહંકૃત્યાત્મનિર્ભાસો મુખાભાસવદિષ્યતે ॥

US-P18.033ab મુખવત્ સ્થિત આત્માન્યોऽવિવિક્તૌ તૌ તથૈવ ચ ।
US-P18.033cd સંસારી ચ સ ઇત્યેક આભાસો યસ્ત્વહંકૃતિ ॥

US-P18.034ab વસ્તુ ચ્છાયા સ્મૃતેરન્યન્ માધુર્યાદિ ચ કારણમ્ ।
US-P18.034cd ક્ષૈકદેશો વિકારો વા તદાભાસાશ્રયઃ પરે ॥

US-P18.035ab અહંકર્તૈવ સંસારી સ્વતન્ત્ર ઇતિ કેચન ।
US-P18.035cd અહંકારાદિસંતાનઃ સંસારી નાન્વયી પૃથક્ ॥

US-P18.036ab ઇત્યેવં સૌગતા આહુસ્તત્ર ન્યાયો વિચાર્યતામ્ ।
US-P18.036cd સંસારિણાં કથા ત્વાસ્તાં પ્રકૃતં ત્વધુનોચ્યતે ॥

US-P18.037ab મુખાભાસો ય આદર્શે ધર્મો નાન્યતરસ્ય સઃ ।
US-P18.037cd દ્વયોરેકસ્ય ચેદ્ ધર્મો વિયુક્તેઽન્યતરે ભવેત્ ॥

US-P18.038ab મુખેન વ્યપદેશાત્ સ મુખસ્યૈવેતિ ચેન્ મતમ્ ।
US-P18.038cd નાદર્શાનુવિધાનાચ્ ચ મુખે સત્યવિભાવતઃ ॥

US-P18.039ab દ્વયોરેવેતિ ચેત્ તન્ ન દ્વયોરેવાપ્યદર્શનાત્ ।
US-P18.039cd અદૃષ્ટસ્ય સતો દૃષ્ટિઃ સ્યાદ્ રાહોશ્ચન્દ્રસૂર્યયોઃ ॥

US-P18.040ab રાહોઃ પ્રાગેવ વસ્તુત્વં સિદ્ધં શાસ્ત્રપ્રમાણતઃ ।
US-P18.040cd છાયાપક્ષે ત્વવસ્તુત્વં તસ્ય સ્યાત્ પૂર્વયુક્તિતઃ ॥

US-P18.041ab છાયાક્રાન્તેર્નિષેધોઽયં ન તુ વસ્તુત્વસાધકઃ ।
US-P18.041cd ન હ્યર્થાન્તરનિષ્ટં સદ્ વાક્યમર્થાન્તરં વદેત્ ॥

US-P18.042ab માધુર્યાદિ ચ યત્ કાર્યમુષ્ણદ્રવ્યાદ્યસેવનાત્ ।
US-P18.042cd છાયાયા ન ત્વદૃષ્ટત્વાદપામેવ ચ દર્શનાત્ ॥

US-P18.043ab આત્માભાસાશ્રયાશ્ચૈવં મુખાભાસાશ્રયા યથા ।
US-P18.043cd ગમ્યતે શાસ્ત્રયુક્તિભ્યામાભાસાસત્ત્વમેવ ચ ॥

US-P18.044ab ન દૃશેરવિકારિત્વાદાભાસસ્યાપ્યવસ્તુતઃ ।
US-P18.044cd નાચિતિત્વાદહંકર્તુઃ કસ્ય સંસારિતા ભવેત્ ॥

US-P18.045ab અવિદ્યામાત્ર એવાતઃ સંસારોઽસ્ત્વવિવેકતઃ ।
US-P18.045cd કૂટસ્થેનાત્મના નિત્યમાત્મવાનાત્મનીવ સઃ ॥

US-P18.046ab રજ્જુસર્પો યથા રજ્જ્વા સાત્મકઃ પ્રાગ્ વિવેકતઃ ।
US-P18.046cd અવસ્તુસન્નપિ હ્યેષ કૂટસ્થેનાત્મના તથા ॥

US-P18.047ab આત્માભાસાશ્રયશ્ચાત્મા પ્રત્યયૈઃ સ્વૈર્વિકારવાન્ ।
US-P18.047cd સુખી દુઃખી ચ સંસારી નિત્ય એવેતિ કેચન ॥

US-P18.048ab આત્માભાસાપરિજ્ઞાનાદ્ યથાત્મ્યેન વિમોહિતાઃ ।
US-P18.048cd અહંકર્તારમાત્મેતિ મન્યન્તે તે નિરાગમાઃ ॥

US-P18.049ab સંસારો વસ્તુસંસ્તેષાં કર્તૃભોક્તૃત્વલક્ષણઃ ।
US-P18.049cd આત્માભાસાશ્રયાજ્ઞાનાત્ સંસરન્ત્યવિવેકતઃ ॥

US-P18.050ab ચૈતન્યાભાસતા બુદ્ધેરાત્મનસ્તત્સ્વરૂપતા ।
US-P18.050cd સ્યાચ્ ચેત્ તં જ્ઞાનશબ્દૈશ્ચ વેદઃ શાસ્તીતિ યુજ્યતે ॥

US-P18.051ab પ્રકૃતિપ્રત્યયાર્થૌ યૌ ભિન્નાવેકાશ્રયૌ યથા ।
US-P18.051cd કરોતિ ગચ્છતીત્યાદૌ દૃષ્ટૌ લોકપ્રસિદ્ધિતઃ ॥

US-P18.052ab નાનયોર્દ્વ્યાશ્રયત્વં તુ લોકે દૃષ્ટં સ્મૃતૌ તથા ।
US-P18.052cd જાનાત્યર્થેષુ કો હેતુર્દ્વ્યાશ્રયત્વે નિગદ્યતામ્ ॥

US-P18.053ab આત્માભાસસ્તુ તિઙ્વાચ્યો ધાત્વર્થશ્ચ ધિયઃ ક્રિયા ।
US-P18.053cd ઉભયં ચાવિવેકેન જાનાતીત્યુચ્યતે મૃષા ॥

US-P18.054ab ન બુદ્ધેરવબોધોઽસ્તિ નાત્મનો વિદ્યતે ક્રિયા ।
US-P18.054cd અતો નાન્યતરસ્યાપિ જાનાતીતિ ચ યુજ્યતે ॥

US-P18.055ab નાપ્યતો ભાવશબ્દેન જ્ઞપ્તિરિત્યપિ યુજ્યતે ।
US-P18.055cd ન હ્યાત્મા વિક્રિયામાત્રો નિત્ય આત્મેતિશાસનાત્ ॥

US-P18.056ab ન બુદ્ધેર્બુદ્ધિવાચ્યત્વં કરણં ન હ્યકર્તૃકમ્ ।
US-P18.056cd નાપિ જ્ઞાયત ઇત્યેવં કર્મશબ્દૈર્નિરુચ્યતે ॥

US-P18.057ab ન યેષામેક એવાત્મા નિર્દુઃખોઽવિક્રિયઃ સદા ।
US-P18.057cd તેષાં સ્યાચ્છબ્દવાચ્યત્વં જ્ઞેયત્વં ચાત્મનઃ સદા ॥

US-P18.058ab યદાહંકર્તુરાત્મત્વં તદા શબ્દાર્થમુખ્યતા ।
US-P18.058cd નાશનાયાદિમત્ત્વાત્ તુ શ્રુતૌ તસ્યાત્મતેષ્યતે ॥

US-P18.059ab હન્ત તર્હિ ન મુખ્યાર્થો નાપિ ગૌણઃ કથંચન ।
US-P18.059cd જાનાતીત્યાદિશબ્દસ્ય ગતિર્વાચ્યા તથાપિ તુ ॥

US-P18.060ab શબ્દાનામયથાર્થત્વે વેદસ્યાપ્યપ્રમાણતા ।
US-P18.060cd સા ચ નેષ્ટા તતો ગ્રાહ્યા ગતિરસ્ય પ્રસિદ્ધિતઃ ॥

US-P18.061ab પ્રસિદ્ધિર્મૂઢલોકસ્ય યદિ ગ્રાહ્યા નિરાત્મતા ।
US-P18.061cd લોકાયતિકસિદ્ધાન્તઃ સ ચાનિષ્ટઃ પ્રસજ્યતે ॥

US-P18.062ab અભિયુક્તપ્રસિદ્ધિશ્ચેત્ પૂર્વવદ્ દુર્વિવેકતા ।

US-P18.062cd ગતિશૂન્યં ન વેદોઽયં પ્રમાણં સંવદત્યુત ॥

US-P18.063ab આદર્શમુખસામાન્યં મુખસ્યેષ્ટં હિ માનવૈઃ ।
US-P18.063cd મુખસ્ય પ્રતિબિમ્બો હિ મુખાકારેણ દૃશ્યતે ॥

US-P18.064ab યત્ર યસ્યાવભાસસ્તુ તયોરેવાવિવેકતઃ ।
US-P18.064cd જાનાતીતિ ક્રિયાં સર્વો લોકો વક્તિ સ્વભાવતઃ ॥

US-P18.065ab બુદ્ધેઃ કર્તૃત્વમધ્યસ્ય જાનાતીતિ જ્ઞ ઉચ્યતે ।
US-P18.065cd તથા ચૈતન્યમધ્યસ્ય જ્ઞત્વં બુદ્ધેરિહોચ્યતે ॥

US-P18.066ab સ્વરૂપં ચાત્મનો જ્ઞાનં નિત્યં જ્યોતિઃ શ્રુતેર્યતઃ ।
US-P18.066cd ન બુદ્ધ્યા ક્રિયતે તસ્માન્ નાત્મનાન્યેન વા સદા ॥

US-P18.067ab દેહેઽહંપ્રત્યયો યદ્વજ્ જાનાતીતિ ચ લૌકિકાઃ ।
US-P18.067cd વદન્તિ જ્ઞાનકર્તૃત્વં તદ્વદ્ બુદ્ધેસ્તથાત્મનઃ ॥

US-P18.068ab બૌદ્ધૈસ્તુ પ્રત્યયૈરેવં ક્રિયમાણૈશ્ચ ચિન્નિભૈઃ ।
US-P18.068cd મોહિતાઃ ક્રિઅયે જ્ઞાનમિત્યાહુસ્તાર્કિકા જનાઃ ॥

US-P18.069ab તસ્માજ્ જ્ઞાભાસબુદ્ધીનામવિવેકાત્ પ્રવર્તિતાઃ ।
US-P18.069cd જાનાતીત્યાદિશબ્દશ્ચ પ્રત્યયો યા ચ તત્સ્મૃતિઃ ॥

US-P18.070ab આદર્શાનુવિધાયિત્વં છાયાયા અસ્યતે મુખે ।
US-P18.070cd બુદ્ધિધર્માનુકારિત્વં જ્ઞાભાસસ્ય તથેષ્યતે ॥

US-P18.071ab બુદ્ધેસ્તુ પ્રત્યયાસ્તસ્માદાત્માભાસેન દીપિતાઃ ।
US-P18.071cd ગ્રાહકા ઇવ ભાસન્તે દહન્તીવોલ્મુકાદયઃ ॥

US-P18.072ab સ્વયમેવાવભાસ્યન્તે ગ્રાહકાઃ સ્વયમેવ ચ ।
US-P18.072cd ઇત્યેવં ગ્રાહકાસ્તીત્વં પ્રતિષેધન્તિ સૌગતાઃ ॥

US-P18.073ab યદ્યેવં નાન્યદૃશ્યાસ્તે કિં તદ્વારણમુચ્યતામ્ ।
US-P18.073cd ભાવાભાવૌ હિ તેષાં યૌ નાન્યગ્રાહ્યૌ સદા યદિ ॥

US-P18.074ab અન્વયિ ગ્રાહકસ્તેષામિત્યેતદપિ તત્સમમ્ ।
US-P18.074cd અચિતિત્વસ્ય તુલ્યત્વાદન્યસ્મિન્ ગ્રાહકે સતિ ॥

US-P18.075ab અધ્યક્ષસ્ય સમીપે તુ સિદ્ધિઃ સ્યાદિતિ ચેન્ મતમ્ ।
US-P18.075cd નાધ્યક્ષેઽનુપકારિત્વાદન્યત્રાપિ પ્રસઙ્ગતઃ ॥

US-P18.076ab અર્થી દુઃખી ચ યઃ શ્રોતા સ ત્વધ્યક્ષોઽથવેતરઃ ।
US-P18.076cd અધ્યક્ષસ્ય ચ દુઃખિત્વમર્થિત્વં ચ ન તે મતમ્ ॥

US-P18.077ab કર્તાધ્યક્ષઃ સદસ્મીતિ નૈવ સદ્ગ્રહમર્હતિ ।
US-P18.077cd સદેવાસીતિ મિથ્યોક્તિઃ શ્રુતેરપિ ન યુજ્યતે ॥

US-P18.078ab અવિવિચ્યોભયં વક્તિ શ્રુતિશ્ચેત્ સ્યાદ્ ગ્રહસ્તથા ।
US-P18.078cd અસ્મદસ્તુ વિવિચ્યૈવ ત્વમેવેતિ વદેદ્ યદિ ॥

US-P18.079ab પ્રત્યયાન્વયિનિષ્ઠત્વમુક્તો દોષઃ પ્રસજ્યતે ।
US-P18.079cd ત્વમિત્યધ્યક્ષનિષ્ઠશ્ચેદહમધ્યક્ષયોઃ કથમ્ ॥

US-P18.080ab સંબન્ધો વાચ્ય એવાત્ર યેન ત્વમિતિ લક્ષયેત્ ।
US-P18.080cd દ્રષ્ટૃદૃશ્યત્વસંબન્ધો યદ્યધ્યક્ષેઽક્રિયે કથમ્ ॥

US-P18.081ab અક્રિયત્વેઽપિ તાદાત્મ્યમધ્યક્ષસ્ય ભવેદ્ યદિ ।
US-P18.081cd આત્માધ્યક્ષો મમાસ્તીતિ સંબન્ધાગ્રહણે ન ધીઃ ॥

US-P18.082ab સંબન્ધગ્રહણં શાસ્ત્રાદિતિ ચેન્ મન્યસે ન હિ ।
US-P18.082cd પૂર્વોક્તાઃ સ્યુસ્ત્રિધા દોષા ગ્રહો વા સ્યાન્ મમેતિ ચ ॥

US-P18.083ab અદૃશિર્દૃશિરૂપેણ ભાતિ બુદ્ધિર્યદા સદા ।
US-P18.083cd પ્રત્યયા અપિ તસ્યાઃ સ્યુસ્તપ્તાયોવિસ્ફુલિઙ્ગવત્ ॥

US-P18.084ab આભાસસ્તદભાવશ્ચ દૃશેઃ સીમ્નો ન ચાન્યથા ।
US-P18.084cd લોકસ્ય યુક્તિતઃ સ્યાતાં તદ્ગ્રહશ્ચ તથા સતિ ॥

US-P18.085ab નન્વેવં દૃશિસંક્રાન્તિરયઃપિણ્ડેઽગ્નિવદ્ ભવેત્ ।
US-P18.085cd મુખાભાસવદિત્યેતદાદર્શે તન્ નિરાકૃતમ્ ॥

US-P18.086ab કૃષ્ણાયો રોહિતાભાસમિત્યેતદ્ દૃષ્ટમુચ્યતે ।
US-P18.086cd દૃષ્ટદાર્ષ્ટાન્તુલ્યત્વં ન તુ સર્વાત્મના ક્વચિત્ ॥

US-P18.087ab તથૈવ ચેતનાભાસં ચિત્તં ચૈતન્યવદ્ ભવેત્ ।
US-P18.087cd મુખાભાસો યથાદર્શ આભાસશ્ચોદિતો મૃષા ॥

US-P18.088ab ચિત્તં ચેતનમિત્યેતચ્છાસ્ત્રયુક્તિવિવર્જિતમ્ ।
US-P18.088cd દેહસ્યાપિ પ્રસઙ્ગઃ સ્યાચ્ ચક્ષુરાદેસ્તથૈવ ચ ॥

US-P18.089ab તદપ્યસ્ત્વિતિ ચેત્ તન્ ન લોકાયતિકસંગતેઃ ।
US-P18.089cd ન ચ ધીર્દૃશિરસ્મીતિ યદ્યાભાસો ન ચેતસિ ॥

US-P18.090ab સદસ્મીતિ ધિયોઽભાવે વ્યર્થં સ્યાત્ તત્ ત્વમસ્યપિ ।
US-P18.090cd યુષ્મદસ્મદ્વિવેકજ્ઞે સ્યાદર્થવદિદં વચઃ ॥

US-P18.091ab મમેદંપ્રત્યયૌ જ્ઞેયૌ યુષ્મદ્યેવ ન સંશયઃ ।
US-P18.091cd અહમિત્યસ્મદીષ્ટઃ સ્યાદયમસ્મીતિ ચોભયોઃ ॥

US-P18.092ab અન્યોન્યાપેક્ષયા તેષાં પ્રધાનગુણતેષ્યતે ।
US-P18.092cd વિશેષનવિશેષ્યત્વં તથા ગ્રાહ્યં હિ યુક્તિતઃ ॥

US-P18.093ab મમેદં દ્વયમપ્યેતન્ મધ્યમસ્ય વિશેષણમ્ ।
US-P18.093cd ધની ગોમાન્ યથા તદ્વદ્ દેહોઽહંકર્તુરેવ  ચ ॥

US-P18.094ab બુદ્ધ્યારૂઢં સદા સર્વં સાહંકર્ત્રા ચ સાક્ષિણઃ ।
US-P18.094cd તસ્માત્ સર્વાવભાસો જ્ઞઃ કિંચિદપ્યસ્પૃશન્ સદા ॥

US-P18.095ab પ્રતિલોમમિદં સર્વં યથોક્તં લોકબુદ્ધિતઃ ।
US-P18.095cd અવિવેકધિયામસ્તિ નાસ્તિ સર્વં વિવેકિનામ્ ॥

US-P18.096ab અન્વયવ્યતિરેકૌ હિ પદાર્થસ્ય પદસ્ય ચ ।
US-P18.096cd સ્યાદેતદહમિત્યત્ર યુક્તિરેવાવધારણે ॥

US-P18.097ab નાદ્રાક્ષમહમિતિ અસ્મિન્ સુષુપ્તેઽન્યન્ મનાગપિ ।
US-P18.097cd ન વારયતિ દૃષ્ટિં સ્વાં પ્રત્યયં તુ નિષેધતિ ॥

US-P18.098ab સ્વયંજ્યોતિર્ન હિ દ્રષ્ટુરિત્યેવં સંવિદોઽસ્થિતામ્ ।
US-P18.098cd કૌટસ્થ્યં ચ તથા તસ્યાઃ પ્રત્યયસ્ય ચ લુપ્તતામ્ ।
US-P18.098ef સ્વયમેવાબ્રવીચ્  છાસ્ત્રં પ્રત્યયાવગતી પૃથક્ ॥

US-P18.099ab એવં વિજ્ઞાતવાક્યાર્થે શ્રુતિલોકપ્રસિદ્ધિતઃ ।
US-P18.099cd શ્રુતિસ્તત્ ત્વમસીત્યાહ શ્રોતુર્મોહાપનુત્તયે ॥

US-P18.100ab બ્રહ્મા દાશરથેર્યદ્વદુક્ત્વૈવાપાનુદત્ તમઃ ।
US-P18.100cd તસ્ય વિષ્ણુત્વસંબોધે ન યત્નાન્તરમૂચિવાન્ ॥

US-P18.101ab અહંશબ્દસ્ય યા નિષ્ઠા જ્યોતિષિ પ્રત્યગાત્મનિ ।
US-P18.101cd સૈવોક્તા સદસીત્યેવં ફલં તત્ર વિમુક્તતા ॥

US-P18.102ab શ્રુતમાત્રે ન ચેત્ સ્યાત્ કાર્યં તત્ર ભવેદ્ ધ્રુવમ્ ।
US-P18.102cd વ્યવહારાત્ પુરાપીષ્ટઃ સદ્ભાવઃ સ્વયમાત્મનઃ ॥

US-P18.103ab અશનાયાદિનિર્મુક્ત્યૈ તત્કાલા જાયતે પ્રમા ।
US-P18.103cd તત્ત્વમસ્યાદિવાક્યાર્થે ત્રિષુ કાલેષ્વસંશયઃ ॥

US-P18.104ab પ્રતિબન્ધવિહીનત્વાત્ સ્વયં ચાનુભવાત્મનઃ ।
US-P18.104cd જાયેતૈવ પ્રમા તત્ર સ્વાત્મન્યેવ ન સંશયઃ ॥

US-P18.105ab કિં સદેવાહમસ્મીતિ કિં વાન્યત્ પ્રતિપદ્યતે ।
US-P18.105cd સદેવ ચેદહંશબ્દઃ સતા મુખ્યાર્થ ઇષ્યતામ્ ॥

US-P18.106ab અન્યચ્ ચેત્ સદહંગ્રાહપ્રતિપત્તિર્મૃષૈવ સા ।
US-P18.106cd તસ્માન્ મુખ્યગ્રહે નાસ્તિ વારણાવગતેરિહ ॥

US-P18.107ab પ્રત્યયી પ્રત્યયશ્ચૈવ યદાભાસૌ તદર્થતા ।
US-P18.107cd તયોરચિતિમત્ત્વાચ્ ચ ચૈતન્યે કલ્પ્યતે ફલમ્ ॥

US-P18.108ab કૂટસ્થેઽપિ ફલં યોગ્યં રાજનીવ જયાદિકમ્ ।
US-P18.108cd તદનાત્મત્વહેતુભ્યાં ક્રિયાયાઃ પ્રત્યયસ્ય ચ ॥

US-P18.109ab આદર્શસ્તુ યદાભાસો મુખાકારઃ સ એવ સઃ ।
US-P18.109cd યથૈવં પ્રત્યયાદર્શો યદાભાસસ્તદા હ્યહમ્ ॥

US-P18.110ab ઇત્યેવં પ્રતિપત્તિઃ સ્યાત્ સદસ્મીતિ ચ નાન્યથા ।
US-P18.110cd તત્ ત્વમિત્યુપદેશોઽપિ દ્વારાભાવાદનર્થકઃ ॥

US-P18.111ab શ્રોતુઃ સ્યાદુપદેશશ્ચેદર્થવત્ત્વં તથા ભવેત્ ।
US-P18.111cd અધ્યક્ષસ્ય ન ચેદિષ્ટં શ્રોતૃત્વં કસ્ય તદ્ ભવેત્ ॥

US-P18.112ab અધ્યક્ષસ્ય સમીપે સ્યાદ્ બુદ્ધેરેવેતિ ચેન્ મતમ્ ।
US-P18.112cd ન તત્કૃતોપકારોઽસ્તિ કાષ્ઠાદ્ યદ્વન્ ન કલ્પ્યતે ॥

US-P18.113ab બુદ્ધૌ ચેત્ તત્કૃતઃ કશ્ચિન્ નન્વેવં પરિણામિતા ।
US-P18.113cd આભાસેઽપિ ચ કો દોષઃ સતિ શ્રુત્યાદ્યનુગ્રહે ॥

US-P18.114ab આભાસે પરિણામશ્ચેન્ ન રજ્જ્વાદિનિભત્વવત્ ।
US-P18.114cd સર્પાદિશ્ચ તથાવોચમાદર્શે ચ મુખત્વવત્ ॥

US-P18.115ab નાત્માભાસત્વસિદ્ધિશ્ચેદાત્મનો ગ્રહણાત્ પૃથક્ ।
US-P18.115cd મુખાદેસ્તુ પૃથક્સિદ્ધિરિહ ત્વન્યોન્યસંશ્રયઃ ॥

US-P18.116ab અધ્યક્ષસ્ય પૃથક્સિદ્ધાવાભાસસ્ય તદીયતા ।
US-P18.116cd આભાસસ્ય તદીયત્વે હ્યધ્યક્ષવ્યતિરિક્તતા ॥

US-P18.117ab નૈવં સ્વપ્ને પૃથક્સિદ્ધેઃ પ્રત્યયસ્ય દૃશેસ્તથા ।
US-P18.117cd રથાદેસ્તત્ર શૂન્યત્વાત્ પ્રત્યયસ્યાત્મના ગ્રહઃ ॥

US-P18.118ab અવગત્યા હિ સંવ્યાપ્તઃ પ્રત્યયો વિષયાકૃતિઃ ।
US-P18.118cd જાયતે સ યદાકારઃ સ બાહ્યો વિષયો મતઃ ॥

US-P18.119ab કર્મેપ્સિતતમત્વાત્ સ તદ્વાન્ કાર્યે નિયુજ્યતે ।
US-P18.119cd આકારો યત્ર ચાર્પ્યેત કરણં તદિહોચ્યતે ॥

US-P18.120ab યદાભાસેન સંવ્યાપ્તઃ સ જ્ઞાતેતિ નિગદ્યતે ।
US-P18.120cd ત્રયમેતદ્ વિવિચ્યાત્ર યો જાનાતિ સ આત્મવિત્ ॥

US-P18.121ab સમ્યક્સંશયમિથ્યોક્તાઃ પ્રત્યયા વ્યભિચારિણઃ ।
US-P18.121cd એકૈવાવગતિસ્તેષુ ભેદસ્તુ પ્રત્યયાર્પિતઃ ॥

US-P18.122ab આધિભેદાદ્ યથા ભેદો મણેરવગતેસ્તથા ।
US-P18.122cd અશુદ્ધિઃ પરિણામશ્ચ સર્વં પ્રત્યયસંશ્રયાત્ ॥

US-P18.123ab પ્રથનં ગ્રહણં સિદ્ધિઃ પ્રત્યયાનામિહાન્યતઃ ।
US-P18.123cd આપરોક્ષ્યાત્ તદેવોક્તમનુમાનં પ્રદીપવત્ ॥

US-P18.124ab કિમજ્ઞં ગ્રાહયેત્ કશ્ચિત્ પ્રમાણેન તુ કેનચિત્ ।
US-P18.124cd વિનૈવ તુ પ્રમાણેન નિવૃત્ત્યાન્યસ્ય શેષતઃ ॥

US-P18.125ab શબ્દેનૈવ પ્રમાણેન નિવૃત્તિશ્ચેદિહોચ્યતે ।
US-P18.125cd અધ્યક્ષસ્યાપ્રસિદ્ધત્વાચ્છૂન્યતૈવ પ્રસજ્યતે ॥

US-P18.126ab ચેતનસ્ત્વં કથં દેહ ઇતિ ચેન્ નાપ્રસિદ્ધિતઃ ।
US-P18.126cd ચેતનસ્યાન્યતાસિદ્ધાવેવં સ્યાદન્યહાનતઃ ॥

US-P18.127ab અધ્યક્ષઃ સ્વયમસ્ત્યેવ ચેતનસ્યાપરોક્ષતઃ ।
US-P18.127cd તુલ્ય એવં પ્રબોધઃ સ્યાદજ્ઞસ્યાસત્ત્વવાદિના ॥

US-P18.128ab અહમજ્ઞાસિષં ચેદમિતિ લોકસ્મૃતેરિહ ।
US-P18.128cd કરણં કર્મ કર્તા ચ સિદ્ધાસ્ત્વેકક્ષણે કિલ ॥

US-P18.129ab પ્રામાણ્યેઽપિ સ્મૃતેઃ શૈઘ્ર્યાદ્ યૌગપદ્યં વિભાવ્યતે ।
US-P18.129cd ક્રમેણ ગ્રહણં પૂર્વં સ્મૃતેઃ પશ્ચાત્ તથૈવ ચ ॥

US-P18.130ab અજ્ઞાસિષમિદં માં ચેત્યપેક્ષા જાયતે ધ્રુવમ્ ।

US-P18.130cd વિશેષોઽપેક્ષ્યતે યત્ર તત્ર નૈવૈકકાલતા ॥

US-P18.131ab આત્મનો ગ્રહણે ચાપિ ત્રયાણામિહ સંભવાત્ ।
US-P18.131cd આત્મન્યાસક્તકર્તૃત્વં ન સ્યાત્ કરણકર્મણઃ ॥

US-P18.132ab વ્યાપ્તુમિષ્ટં ચ યત્ કરતુઃ ક્રિયયા કર્મ તત્ સ્મૃતમ્ ।
US-P18.132cd અતો હિ કર્તૃતન્ત્રત્વં તસ્યેષ્ટં નાન્યતન્ત્રતા ।
US-P18.133ab શબ્દાદ્ વાનુમિતેર્વાપિ પ્રમાણાદ્ વા તતોઽન્યતઃ ।
US-P18.133cd સિદ્ધિઃ સર્વપદાર્થાનાં સ્યાદજ્ઞં પ્રતિ નાન્યથા ॥

US-P18.134ab અધ્યક્ષસ્યાપિ સિદ્ધિઃ સ્યાત્ પ્રમાણેન વિનૈવ વા ।
US-P18.134cd વિના સ્વસ્ય પ્રસિદ્ધિસ્તુ નાજ્ઞં પ્રત્યુપયુજ્યતે ॥

US-P18.135ab તસ્યૈવાજ્ઞત્વમિષ્ટં ચેજ્ જ્ઞાતત્વેઽન્યા મિતિર્ભવેત્ ।
US-P18.135cd અન્યસ્યૈવાજ્ઞતાયાં ચ તદ્વિજ્ઞાને ધ્રુવા ભવેત્ ॥

US-P18.136ab જ્ઞાતતા સ્વામલાભો વા સિદ્ધિઃ સ્યાદન્યદેવ વા ।
US-P18.136cd જ્ઞાતત્વેઽનન્તરક્તૌ ત્વં પક્ષૌ સંસ્મર્તુમર્હસિ ॥

US-P18.137ab સિદ્ધિઃ સ્યાત્ સ્વાત્મલાભશ્ચેદ્ યત્નસ્તત્ર નિરર્થકઃ ।
US-P18.137cd સર્વલોકપ્રસિદ્ધત્વાત્ સ્વહેતુભ્યસ્તુ વસ્તુનઃ ॥

US-P18.138ab જ્ઞાનજ્ઞેયાદિવાદેઽતઃ સિદ્ધિર્જ્ઞાતત્વમુચ્યતે ।
US-P18.138cd અધ્યક્ષાધ્યક્ષ્યયોઃ સિદ્ડિર્જ્ઞેયત્વં નાત્મલાભતા ॥

US-P18.139ab સ્પષ્ટત્વં કર્મકર્ત્રાદેઃ સિદ્ધતા યદિ કલ્પ્યતે ।
US-P18.139cd સ્પષ્ટતાસ્પષ્ટતે સ્યાતામન્યસ્યૈવ ન ચાત્મનઃ ॥

US-P18.140ab અદ્રષ્ટુર્નૈવ ચાન્ધસ્ય સ્પષ્ટીભાવો ઘટસ્ય તુ ।
US-P18.140cd કર્ત્રાદેઃ સ્પષ્ટતેષ્ટા ચેદ્ દ્રષ્ટતાધ્યક્ષકર્તૃકા ॥

US-P18.141ab અનુભૂતેઃ કિમન્યસ્મિન્ સ્યાત્ તવાપેક્ષયા વદ ।
US-P18.141cd અનુભવિતરીષ્ટા સ્યાત્ સોઽપ્યનુભૂતિરેવ નઃ ॥

US-P18.142ab ૦ક઼્ અભિન્નોઽપિ હિ બુદ્ધ્યાત્મા વિપર્યાસિતદર્શનૈઃ ।
US-P18.142cd ગ્રાહ્યગ્રાહકસંવિત્તિભેદવાનિવ લક્ષ્યતે૮ક઼્ ॥

US-P18.143ab ભૂતિર્યેષાં ક્રિયા સૈવ કારકં સૈવ ચોચ્યતે ।
US-P18.143cd સત્ત્વં નાશિત્વમસ્યાશ્ચેત્ સકર્તૃત્વં થતેષ્યતામ્ ।
US-P18.143ef ન કશ્ચિચ્ ચેષ્યતે ધર્મ ઇતિ ચેત્ પક્ષહાનતા ॥

US-P18.144ab નન્વસ્તિત્વાદયો ધર્મા નાસ્તિત્વાદિનિવૃત્તયઃ ।
US-P18.144cd ન ભૂતેસ્તર્હિ નાશિત્વં સ્વાલક્ષણ્યં હિ તે ॥

US-P18.145ab સ્વલક્ષણાવધિર્નાશો નાશોઽનાશનિવૃત્તિતા ।
US-P18.145cd અગોરસત્ત્વં ગોત્વં તે ન તુ તદ્ ગોઃ સ્વલક્ષણમ્ ॥

US-P18.146ab ક્ષણવાચ્યોઽપિ યોઽર્થઃ સ્યાત્ સોઽપ્યન્યાભાવ એવ તે ।
US-P18.146cd ભેદાભાવેઽપ્યભાવસ્ય ભેદો નામભિરિષ્યતે ॥

US-P18.147ab નામભેદૈરનેકત્વમેકસ્ય સ્યાત્ કથં તવ ।
US-P18.147cd અપોહો યદિ ભિન્નાનાં વૃત્તિસ્તસ્ય કથં ગવિ ॥

US-P18.148ab નાભાવા ભેદકાઃ સર્વે વિશેષા વા કદાચન ।
US-P18.148cd નામજાત્યાદયો યદ્વત્ સંવિદસ્તેઽવિશેષતઃ ॥

US-P18.149ab પ્રત્યક્ષમનુમાનં વા વ્યવહારે યદીચ્છસિ ।
US-P18.149cd દ્રિયાદારકભેદૈસ્તદભ્યુપેયં ધ્રુવં ભવેત્ ॥

US-P18.150ab તસ્માન્ નીલં તથા પીતં ઘટાદિર્વા વિશેષણમ્ ।
US-P18.150cd સંવિદસ્તદુપેત્યં સ્યાદ્ યેન ચાપ્યનુભૂયતે ॥

US-P18.151ab રૂપાદીનાં યથાન્યઃ સ્યાદ્ ગ્રાહ્યત્વાદ્ ગ્રાહકસ્તથા ।
US-P18.151cd પ્રત્યયસય થતાન્યઃ સ્યાદ્ વ્યઞ્જકત્વાચ્ ચ દીપવત્ ॥

US-P18.152ab અધ્યક્ષસ્ય દૃશેઃ કીદૃક્ સંબન્ધઃ સંભવિષ્યતિ ।
US-P18.152cd અધ્યકૃયેણ તુ દૃશ્યેન મુક્ત્વાન્યો દ્રષ્ટૃદૃશ્યતામ્ ॥

US-P18.153ab અધ્યક્ષેણ કૃતા દૃષ્ટિર્દૃશ્યં વ્યાપ્નોત્યતાપિ વા ।
US-P18.153cd નિત્યાધ્યક્ષકૃતઃ દશ્ચિદુપકારો ભવેદ્ ધિયામ્ ॥

US-P18.154ab સ ચોક્તસ્તન્નિભત્વં પ્રાક્ સંવ્યાપ્તિશ્ચ ઘટાદિષુ ।
US-P18.154cd યથાલોકાદિસંવ્યાપ્તિર્વ્યઞ્જકત્વાદ્ ધ્યસ્થતા ॥

US-P18.155ab આલોકસ્થો ઘટો યદ્વદ્ બુદ્ધ્યારૂઢો ભવેત્ તથા ।
US-P18.155cd ધીવ્યાપ્તિઃ સ્યાદ્ ઘટારોહો ધિયો વ્યાપ્તૌ કર્મો ભવેત્ ॥

US-P18.156ab પૂર્વં સ્યાત્ પ્રત્યયવ્યાપ્તિસ્તતોઽનુગ્રહ આત્મનઃ ।
US-P18.156cd કૃત્સ્નાધ્યક્ષસ્ય સોઽયુક્તઃ કાલાકાશાદિવત્ ક્રમઃ ॥

US-P18.157ab વિષયગ્રહણં યસ્ય કારણાપેક્ષયા ભવેત્ ।
US-P18.157cd સત્યેવ ગ્રાહ્યશેષે ચ પરિણામી સ ચિત્તવત્ ॥

US-P18.158ab અધ્યક્ષોઽહમિતિ જ્ઞાનં બુદ્ધેરેવ વિનિશ્ચયઃ ।
US-P18.158cd નાધ્યક્ષસ્યાવિશેષત્વાન્ ન તસ્યાસ્તિ પરો યતઃ ॥

US-P18.159ab કર્ત્રા ચેદહમિત્યેવમનુભૂયેત મુક્તતા ।
US-P18.159cd સુખદુઃખવિનિર્મોકો નાહંકર્તરિ યુજ્યતે ॥

US-P18.160ab દેહાદાવભિમાનોત્થો દુઃખીતિ પ્રત્યયો ધ્રુવમ્ ।
US-P18.160cd કુણ્ડલિપ્રત્યયો યદ્વત્ પ્રત્યગાત્માભિમાનિના ॥

US-P18.161ab બાધ્યતે પ્રત્યયેનેહ વિવેકેનાવિવેકવાન્ ।
US-P18.161cd વિપર્યયેઽસદન્તં સ્યાત્ પ્રમાણસ્યાપ્રમાણતઃ ॥

US-P18.162ab દાહચ્છેદવિનાશેષુ દુઃખિત્વં નાન્યથાત્મનઃ ।
US-P18.162cd નૈવ હ્યન્યસ દાહાદાવન્યો દુઃખી ભવેત્ ક્વચિત્ ॥

US-P18.163ab અસ્પર્શત્વાદદેહત્વાન્ નાહં દાહ્યો યતઃ સદા ।
US-P18.163cd તસ્માન્ મિથ્યાભિમાનોત્થં મૃતે પુત્રે મૃતિર્યથા ॥

US-P18.164ab કુણ્ડલ્યહમિતિ હ્યેતદ્ બાધ્યેતૈવ વિવેકિના ।
US-P18.164cd દુઃખીતિ પ્રત્યયસ્તદ્વત્ કેવલાહંધિયા સદા ॥

US-P18.165ab સિદ્ધે દુઃખિત્વ ઇષ્ટં સ્યાત્ તચ્છકિત્વં સદાત્મનઃ ।
US-P18.165cd મિથ્યાભિમાનતો દુઃખી તેનાર્થાપાદનક્ષયઃ ॥

US-P18.166ab અસ્પર્શોઽપિ યથા સ્પર્શમચલશ્ચલનાદિ ચ ।
US-P18.166cd અવિવેકાત્ તથા દુઃખં માનસં ચાત્મનીક્ષતે ॥

US-P18.167ab વિવેકાત્મધિયા દુઃખં નુદ્યતે ચલ્યાદિવત્ ।
US-P18.167cd અવિવેકસ્વભાવેન નમો ગચ્છત્યનિચ્છતઃ ॥

US-P18.168ab તદાનુદૃશ્યતે દુ;ખં નૈશ્ચલ્યે નૈવ તસ્ય તત્ ।
US-P18.168cd પ્રત્યગાત્મનિ તસ્માત્ તદ્ દુ;ખં નૈવોપપદ્યતે ॥

US-P18.169ab ત્વંસતોર્તુલ્યનીડતાન્ નીલાશ્વવદિદં ભવેત્ ।
US-P18.169cd નિર્દુઃખવાચિના યોગાત્ ત્વંશબ્દસ્ય તદર્થતા ॥

US-P18.170ab પ્રત્યગાત્માભિહાનેન તચ્છબ્દસ્ય યુતેસ્તથા ।
US-P18.170cd દશમસ્ત્વમસીત્યેવં વાક્યં સ્યાત્ પ્રત્યક્ઃાત્મનિ ॥

US-P18.171ab સ્વાર્થસ્ય હ્યપ્રહાણેન વિશિષ્ટાર્થસમર્પકૌ ।

US-P18.171cd પ્રત્યગાત્માવગત્યન્તૌ નાન્યોઽર્થોઽર્થાદ્ વિરોધ્યતઃ ॥

US-P18.172ab નવબુદ્ધ્યપહારાદ્ ધિ સ્વાત્માનં દશપૂરણમ્ ।
US-P18.172cd અસશ્યઞ્ જ્ઞાતુમેવેચ્છેત્ સ્વમાત્માનં જનસ્તથા ॥

US-P18.173ab અવિદ્યાબદ્ધચક્ષુષ્ટ્વાત્ કામાપહૃતધીઃ સદા ।
US-P18.173cd વિવિક્તં દૃશિમાત્માનં નેક્ષતે દશમં યથા ॥

US-P18.174ab દશમસ્ત્વમસીત્યેવં તત્ત્વમસ્યાદિવાક્યતઃ ।
US-P18.174cd સ્વમાત્માનં વિજાનાતિ કૃત્સ્નાન્તઃકરણેક્ષણમ્ ॥

US-P18.175ab ઇદં પૂર્વમિદં પશ્ચાત્ પદં વાક્યે ભવેદિતિ ।
US-P18.175cd નિયમો નૈવ વેદેઽસ્તિ પદસાંગત્યમર્થતઃ ॥

US-P18.176ab વાક્યે હિ શ્રૂયમાણાનાં પદાનામર્થસંસ્મૃતિઃ ।
US-P18.176cd અન્વયવ્યતિરેકાભ્યાં તતો વાક્યાર્થબોધનમ્ ॥

US-P18.177ab યદા નિત્યેષુ વાક્યેષુ પદાર્થસ્તુ વિવિચ્યતે ।
US-P18.177cd વાક્યાર્થજ્ઞાનસંક્રાન્ત્યૈ તદા પ્રશ્નો ન યુજ્યતે ॥

US-P18.178ab અન્વયવ્યતિરેકોક્તિઃ પદાર્થસ્મરણાય તુ ।
US-P18.178cd સ્મૃત્યભાવે ન વાક્યાર્થો જ્ઞાતું શક્યો હિ કેનચિત્ ॥

US-P18.179ab તત્ત્વમસ્યાદિવાક્યેષુ ત્વંપદાર્થાવિવેકતઃ ।
US-P18.179cd વ્યજ્યતે નૈવ વાક્યાર્થો નિત્યમુક્તોઽહમિત્યતઃ ॥

US-P18.180ab અન્વયવ્યતિરેકોક્તિસ્તદ્વિવેકાય નાન્યથા ।
US-P18.180cd ત્વંપદાર્થવિવેકે હિ પાણાવર્પિતવિલ્વવત્ ॥

US-P18.181ab વાક્યાર્થો વ્યજ્યતે ચૈવં કેવલોઽહંપદાર્થતઃ ।
US-P18.181cd દુઃખીત્યેતદપોહેન પ્રત્યગાત્મવિનિશ્ચયાત્ ॥

US-P18.182ab તત્રૈવં સંભવત્યર્થે શ્રુતહાનાશ્રુતાર્થધિઃ ।
US-P18.182cd નૈવં કલ્પયિતું યુક્તા પદવાક્યાર્થકોવિદૈઃ ॥

US-P18.183ab પ્રત્યક્ષાદીનિ બાધેરન્ કૃષ્ણલાદિષુ પાકવત્ ।
US-P18.183cd અક્ષજાદિનિભૈરેતૈઃ કથં સ્યાદ્ વાક્યબાધનમ્ ॥

US-P18.184ab દુઃખ્યસ્મીતિ સતિ જ્ઞાને નિર્દુઃખીતિ ન જાયતે ।
US-P18.184cd પ્રત્યક્ષાદિનિભત્વેઽપિ વાક્યાન્ ન વ્યભિચારતઃ ॥

US-P18.185ab સ્વપ્ને દુઃખ્યહમધાસં દાહચ્છેદાદિહેતુતઃ ।
US-P18.185cd તત્કાલભાવિભિર્વાક્યૈર્ન બાધઃ ક્રિયતે યદિ ॥

US-P18.186ab સમાપ્તેસ્તર્હિ દુઃખસ્ય પ્રાક્ ચ તદ્બાધ ઇષ્યતામ્ ।
US-P18.186cd ન હિ દુઃખસ્ય સંતાનો ભ્રાન્તેર્વા દૃશ્યતે ક્વચિત્ ॥

US-P18.187ab પ્રત્યગાત્મન આત્મત્વં દુઃખ્યસ્મીત્યસ્ય બાધયા ।
US-P18.187cd દશમં નવમસ્યેવ વેદ ચેદવિરુદ્ધતા ॥

US-P18.188ab નિત્યમુક્તત્વવિજ્ઞાનં વાક્યાદ્ ભવતિ નાન્યતઃ ।
US-P18.188cd વાક્યાર્થસ્યાપિ વિજ્ઞાનં પદાર્થસ્મૃતિપૂર્વકમ્ ॥

US-P18.189ab અન્વયવ્યતિરેકાભ્યાં પદાર્થઃ સ્મર્યતે ધ્રુવમ્ ।
US-P18.189cd એવં નિર્દુઃખમાત્માનમક્રિયં પ્રતિપદ્યતે ॥

US-P18.190ab સદેવેત્યાદિવાક્યેભ્યઃ પ્રમા સ્ફુટતરા ભવેત્ ।
US-P18.190cd દશમસ્ત્વમસીત્યસ્માદ્ યથૈવં પ્રત્યગાત્મનિ ॥

US-P18.191ab પ્રબોધેન યથા સ્વાપ્નં સર્વં દુઃખં નિવર્તતે ।
US-P18.191cd પ્રત્યગાત્મધિયા તદ્વદ્ દુઃખિત્વં સર્વદાત્મનઃ ॥

US-P18.192ab કૃષ્ણલાદૌ પ્રમાજન્મ તદન્યાર્થામૃદુત્વતઃ ।
US-P18.192cd તત્ત્વમસ્યાદિવાક્યેષુ ન ત્વેવમવિરોધતઃ ॥

US-P18.193ab વાક્યે તત્ ત્વમસીત્યસ્મિઞ્ જ્ઞાતાર્થં તદસિદ્ધયમ્ ।
US-P18.193cd ત્વમર્થસ્મૃત્યસાહાય્યાદ્ વાક્યં નોત્પાદયેત્ પ્રમામ્ ॥

US-P18.194ab તત્ત્વમોસ્તુલ્યનીડાર્થમસીત્યેતત્ પદં ભવેત્ ।
US-P18.194cd તચ્છબ્દઃ પ્રત્યગાત્માર્થસ્તચ્છબ્દાર્થસ્ત્વમસ્તથા ॥

US-P18.195ab દુઃખિત્વાપ્રત્યગાત્મત્વં વારયેતામુભાવપિ ।
US-P18.195cd એવં ચ નેતિનેત્યર્થં ગમયેતાં પરસ્પરમ્ ॥

US-P18.196ab એવં તત્ ત્વમસીત્યસ્ય ગમ્યમાને ફલે કથમ્ ।
US-P18.196cd અપ્રમાણત્વમસ્યોદ્ત્વા ક્રિયાપેક્ષત્વમુચ્યતે ॥

US-P18.197ab તસ્માદાદ્યન્તમધ્યેષુ કુર્વિત્યેતદ્ વિરોધ્યતઃ ।
US-P18.197cd ન કલ્પ્યમશ્રુતત્વાચ્ ચ શ્રુતત્યાગોઽપ્યનર્થકઃ ॥

US-P18.198ab યથાનુભૂયતે તૃપ્તિર્ભુજેર્વાક્યાન્ ન ગમ્યતે ।
US-P18.198cd વાદ્યસ્ય વિધૃતિસ્તદ્વદ્ ગોશકૃત્પાયસિક્રિય ॥

US-P18.199ab સત્યમેવમનાત્માર્થે વાક્યાત્ પારોક્ષબોધનમ્ ।
US-P18.199cd પ્રત્યગાત્મનિ ન ત્વેવં સંહ્યાપ્રાપ્તિવદ્ધ્રુવમ્ ॥

US-P18.200ab સ્વસંવેદ્યત્વપર્યાયઃ સ્વપ્રમાણક ઇષ્યતામ્ ।
US-P18.200cd નિવૃત્તાવહમ્ઃ સિદ્ધઃ સ્વાત્મનોઽનુભવશ્ચ નઃ ॥

US-P18.201ab બુદ્ધીનાં વિષયો દુઃખં તા યસ્ય વિષયા મતાઃ ।
US-P18.201cd કુતોઽસ્ય દુઃખસંબન્ધો દૃશેઃ સ્યાત્ પ્રત્યગાત્મનઃ ॥

US-P18.202ab દૃશિરેવાનુભૂયેત સ્વેનૈવાનુભવાત્મના ।
US-P18.202cd તદાભાસતયા જન્મ ધિયોઽસ્યાન્ભવઃ સ્મૃતઃ ॥

US-P18.203ab અશનાયાદિનિર્મુક્તઃ સિદ્ધો મોક્ષસ્ત્વમેવ સઃ ।
US-P18.203cd શ્રોતવ્યાદિ તવેત્યેતદ્ વિરુદ્ધં કથમુચ્યતે ॥

US-P18.204ab સેત્સ્યતીત્યેવ ચેત્ તત્ સ્યાચ્છ્રવણાદિ તદા ભવેત્ ।
US-P18.204cd મોક્ષસ્યાનિત્યતૈવં સ્યાદ્ વિરોધ્યેવાન્યથા વચઃ ॥

US-P18.205ab શ્રોતૃશ્રોતવ્યયોર્ભેદો યદીષ્ટઃ સ્યાદ્ ભવેદિદમ્ ।
US-P18.205cd ઇષ્ટાર્થકોપ એવં સ્યાન્ ન યુક્તં સર્વથા વચઃ ॥

US-P18.206ab સિદ્ધો મોક્ષોઽહમિત્યેવં જ્ઞાત્વાત્માનં ભવેદ્ યદિ ।
US-P18.206cd ચિકીર્ષુર્યઃ સ મૂઢાત્મા શાસ્ત્રં ચોદ્ઘાટયત્યપિ ॥

US-P18.207ab ન હિ સિદ્ધસ્ય કર્તવ્યં સકાર્યસ્ય ન સિદ્ધતા ।
US-P18.207cd ઉભયાલમ્બનં કુર્વન્નાત્માનં વઞ્ચયત્યસૌ ॥

US-P18.208ab સિદ્ધો મોક્ષસ્ત્વમિત્યેતદ્ વસ્તુમાત્રં પ્રદર્શ્યતે ।
US-P18.208cd શ્રોતુસ્તથાત્વવિજ્ઞાને પ્રવૃત્તિઃ સ્યાત્ કથં ત્વિતિ ॥

US-P18.209ab કર્તા દુઃખ્યહમસ્મીતિ પ્રત્યક્ષેનાનુભૂયતે ।
US-P18.209cd કર્તા દુઃખી ચ મા ભૂવમિતિ યત્નો ભવેત્ તતઃ ॥

US-P18.210ab તદ્વિજ્ઞાનાય યુક્ત્યાદિ કર્તવ્યં શ્રુતિરબ્રવીત્ ।
US-P18.210cd કર્તૃત્વાદ્યનુવાદેન સિદ્ધત્વાનુભયાય તુ ॥

US-P18.211ab નિર્દુઃખો નિષ્ક્રિયોઽકામઃ સિદ્ધો મોક્ષોઽહમિત્યપિ ।
US-P18.211cd ગૃહીત્વૈવવિરુદ્ધાર્થમાદધ્યાત્ કથમેવ સઃ ॥

US-P18.212ab સકામઃ સક્રિયોઽસિદ્ધ ઇતિ મેઽનુભવઃ કથમ્ ।

US-P18.212cd અતો મે વિપરીતસ્ય તદ્ ભવાન્ વક્તુમર્હતિ ॥

US-P18.213ab ઇહૈવ ઘટતે પ્રશ્નો ન મુક્તત્વાનુભૂતયે ।
US-P18.213cd પ્રમાનેન વિરોધી યઃ સોઽત્રાર્થઃ પ્રશ્નમર્હતિ ॥

US-P18.214ab અહં નિર્મુક્ત ઇત્યેષ સદસીત્યન્યમાનજઃ ।
US-P18.214cd પ્રત્યક્ષાભાસજન્યત્વાદ્ દુઃખિત્વં પ્રશ્નમર્હતિ ॥

US-P18.215ab પૃષ્ટમાકાઙ્ક્ષિતં વાચ્યં દુઃખાભાવમભીપ્સિતમ્ ।
US-P18.215cd કથં હીદં નિવર્તેત દુઃખં સર્વાત્મના મમ ॥

US-P18.216ab ઇતિ પ્રશ્નાનુરૂપં યદ્ વાચ્યં દુઃખનિવર્તકમ્ ।
US-P18.216cd શ્રુતેઃ સ્વાત્મનિ નાશઙ્કા પ્રમાણ્યે સતિ વિદ્યતે ॥

US-P18.217ab તસ્માદાત્મવિમુક્તત્વં પ્રત્યાયયતિ તદ્વચઃ ।
US-P18.217cd વક્તવ્યં તુ તહ્તાર્થં સ્યાદ્ વિરોધેઽસતિ કેનચિત્ ॥

US-P18.218ab ઇતોઽન્યોઽનુભવઃ કશ્ચિદાત્મનો નોપપદ્યતે ।
US-P18.218cd અવિજ્ઞાતં વિજાનતાં વિજ્ઞાતારમિતિ શ્રુતેઃ ॥

US-P18.219ab ત્વંપદાર્થવિવેકાય સંન્યાસઃ સર્વકર્મણામ્ ।
US-P18.219cd સાધનત્વં વ્રજત્યેવ શાન્તો દાન્તાદિશાસનાત્ ॥

US-P18.220ab ત્વમર્થં પ્રત્યગાત્માનં પશ્યેદાત્માનમાત્મનિ ।
US-P18.220cd વાક્યાર્થં તત આત્માનં સર્વં પશ્યતિ કેવલમ્ ॥

US-P18.221ab સર્વમાત્મેતિ વાક્યાર્થે વિજ્ઞાતેઽસ્ય પ્રમાણતઃ ।
US-P18.221cd અસત્ત્વે હ્યન્યમાનસ્ય વિધિસ્તં યોજયેત્ કથમ્ ॥

US-P18.222ab તસ્માદ્ વાદ્યાર્થવિજ્ઞાનાન્ નોર્ધ્વં કર્મવિધિર્ભવેત્ ।
US-P18.222cd ન હિ બ્રહ્માસ્મિ કર્તેતિ વિરુદ્ધે ભવતો ધિયૌ ॥

US-P18.223ab બ્રહ્માસ્મીતિ હિ વિધેયં નૈવ કર્તેતી બાધ્યતે ।
US-P18.223cd સકામો બદ્ધ ઇત્યેવં પ્રમાણાભાસજાતયા ॥

US-P18.224ab શાસ્ત્રાદ્ બ્રહ્માસ્મિ નાન્યોઽહમિતિ બુદ્ધિર્ભવેદ્ દૃધા ।
US-P18.224cd યદાયુક્તા તદૈવં ધીર્યથા દેહાત્મધીરિતિ ॥

US-P18.225ab સભયાદભયં પ્રાપ્તસ્તદર્થં યતતે ચ યઃ ।
US-P18.225cd સ પુનઃ સભયં ગન્તું સ્વતન્ત્રશ્ચેન્ ન હીચ્છતિ ॥

US-P18.226ab યથેષ્ટાચરણપ્રાપ્તિઃ સંન્યાસાદિવિધૌ કુતઃ ।
US-P18.226cd પદાર્થાજ્નાનબુદ્ધસ્ય વાદ્યાર્થાનુભવાર્થિનઃ ॥

US-P18.227ab અતઃ સર્વમિદં સિદ્ધં યત્ પ્રાગસ્માભિરીર્તમ્ ॥

US-P18.228ab યો હિ યસ્માદ્ વિરક્તઃ સ્યાન્ નાસૌ તસ્મૈ પ્રવર્તતે ।
US-P18.228cd લોકત્રયાદ્ વિરક્ત્વાન્ મુમ્ક્ષુઃ કિમિતીહતે ॥

US-P18.229ab ક્ષુધયા પિડ્યમાનોઽપિ ન વિષં હ્યત્તુમિચ્છતિ ।
US-P18.229cd મિષ્ટાન્નધ્વસ્તતૃડ્ જાનન્ નામૂઢસ્તજ્ જિઘત્સતિ ॥

US-P18.230ab વેદાન્તવાક્યપુષ્પેભ્યો જ્ઞાનામૃતમધૂત્તમમ્ ।
US-P18.230cd ઉજ્જહારાલિવદ્ યો નસ્તસ્મૈ સદ્ગુરવે નમઃ ॥

US-P19.001ab પ્રયુજ્ય તૃષ્ણાજ્વરનાશકારણં ચિકિત્સિતં જ્ઞાનવિરાગભેષજમ્ ।
US-P19.001cd ન યાતિ કામજ્વરસન્નિપાતજાં શરીરમાલાશતયોગદુઃખિતામ્ ॥

US-P19.002ab અહં મમેતિ ત્વમનર્થમીહસે પરાર્થમિચ્છન્તિ તવાન્ય ઈહિતમ્ ।
US-P19.002cd ન તેઽર્થબોધો ન હિ મેઽસ્તિ ચાર્થિતા તતશ્ચ યુક્તઃ શમ એવ તે મનઃ ॥

US-P19.003ab યતો ન ચાન્યઃ પરમાત્ સનાતનાત્ સદૈવ તૃપ્તોઽહમતો ન મેઽર્થિતા ।
US-P19.003cd સદૈવ મુક્તશ્ચ ન કામયે હિતં યતસ્વ ચેતઃ પ્રશમાય તેઽધિકમ્ ॥

US-P19.004ab ષડૂર્મિમાલાભ્યતિવૃત્ત એવ યઃ સ એવ ચાત્મા જગતશ્ચ નઃ શ્રુતેઃ ।
US-P19.004cd પ્રમાણતશ્ચાપિ મયા પ્રવેદ્યતે મુધૈવ તસ્માચ્ ચ મનસ્તવેહિતમ્ ॥

US-P19.005ab ત્વયિ પ્રશાન્તે ન હિ સાસ્તિ ભેદધીર્યતો જગન્ મોહમુપૈતિ માયયા ।
US-P19.005cd ગ્રહો હિ માયાપ્રભવસ્ય કારણં ગ્રહાદ્ વિમોકે ન હિ સાસ્તિ કસ્યચિત્ ॥

US-P19.006ab ન મેઽસ્તિ મોહસ્તવ ચેષ્ટિતેન હિ પ્રબુદ્ધતત્ત્વસ્ત્વસિતો હ્યવિક્રિયઃ ।
US-P19.006cd ન પૂર્વતત્ત્વોત્તરભેદતા હિ નો વૃથૈવ તસ્માચ્ ચ મનસ્તવેહિતમ્ ॥

US-P19.007ab યતશ્ચ નિત્યોઽહમતો ન ચાન્યથા વિકારયોગે હિ ભવેદનિત્યતા ।
US-P19.007cd સદા પ્રભાતોઽહમતો હિ ચાદ્વયો વિકલ્પિતં ચાપ્યસદિત્યવસ્થિતમ્ ॥

US-P19.008ab અભાવરૂપં ત્વમસીહ હે મનો નિરીક્ષ્યમાણે ન હિ યુક્તિતોઽસ્તિતા ।
US-P19.008cd સતો હ્યનાશાદસતોઽપ્યજન્મતો દ્વયં ચ તેઽતસ્તવ નાસ્તિતેષ્યતે ॥

US-P19.009ab દ્રષ્ટા ચ દૃશ્યં ચ તથા ચ દર્શનં ભ્રમઃ સ સર્વસ્તવ કલ્પિતો હિ સઃ ।
US-P19.009cd દૃશેશ્ચ ભિન્નં ન હિ દૃશ્યમીક્ષ્યતે સ્વપન્ વિબોધે ચ તથા ન ભિદ્યતે ॥

US-P19.010ab વિકલ્પના ચાપિ તથાદ્વયા ભવેદવસ્તુયોગાત્ તદલાતચક્રવત્ ।
US-P19.010cd ન શક્તિભેદોઽસ્તિ યતો ન ચાત્મનાં તતોઽદ્વયત્વં શ્રુતિતોઽવસીયતે ॥

US-P19.011ab મિથશ્ચ ભિન્ના યદિ તે હિ ચેતનાઃ ક્ષયસ્તુ તેષાં પરિમાણયોગતઃ ।
US-P19.011cd ધ્રુવો ભવેદ્ ભેદવતાં હિ દૃષ્ટતો જગત્ક્ષયશ્ચાપિ સમસ્તમોક્ષતઃ ॥

US-P19.012ab ન મેઽસ્તિ કશ્ચિન્ ન ચ સોઽસ્મિ કસ્યચિદ્ યતોઽદ્વયોઽહં ન હિ ચાસ્તિ કલ્પિતમ્ ।
US-P19.012cd અકલ્પિતશ્ચાસ્મિ પુરા પ્રસિદ્ધિતો વિકલ્પનાયા દ્વયમેવ કલ્પિતમ્ ॥

US-P19.013ab વિકલ્પના ચાપ્યભવે ન વિદ્યતે સદન્યદિત્યેવમતો ન નાસ્તિતા ।
US-P19.013cd યતઃ પ્રવૃત્તા તવ ચાપિ કલ્પના પુરા પ્રસિદ્ધેર્ન ચ તદ્ વિકલ્પિતમ્ ॥

US-P19.014ab અસદ્ દ્વયં તેઽપિ હિ યદ્ યદીક્ષતે ન દૃષ્ટમિત્યેવ ન ચૈવ નાસ્તિતા ।
US-P19.014cd યતઃ પ્રવૃત્તા સદસદ્વિકલ્પના વિચારવચ્ ચાપિ તથાદ્વયં ચ સત્ ॥

US-P19.015ab સદભ્યુપેતં ભવતોપકલ્પિતં વિચારહેતોર્યદિ તસ્ય નાસ્તિતા ।
US-P19.015cd વિચારહાનાચ્ ચ તથૈવ સંસ્થિતં ન ચેત્ તદિષ્ટં નિતરાં સદિષ્યતે ॥

US-P19.016ab અસત્સમં ચૈવ સદિત્યપીતિ ચેદનર્થવત્ત્વાત્ ખરશૃઙ્ગતુલ્યતઃ ।
US-P19.016cd અનર્થવત્ત્વં ત્વસતિ હ્યકારણં ન ચૈવ તસ્માન્ ન વિપર્યયેઽન્યથા ॥

US-P19.017ab અસિદ્ધતશ્ચાપિ વિચારકારણાદ્ દ્વયં ચ તસ્માત્ પ્રસૃતં હિ માયયા ।
US-P19.017cd શ્રુતેઃ સ્મૃતેશ્ચાપિ તથા હિ યુક્તિતઃ પ્રસિદ્ધ્યતીત્થં ન તુ યુજ્યતેઽન્યથા ॥

US-P19.018ab વિકલ્પનાચ્ ચાપિ વિધર્મકં શ્રુતેઃ પુરા પ્રસિદ્ધેશ્ચ વિકલ્પિતંઽદ્વયમ્ ।
US-P19.018cd ન ચેતિ નેતીતિ તથા વિકલ્પિતં નિષિધ્યતેઽત્રાપ્યવશેષસિદ્ધયે ॥

US-P19.019ab અકલ્પિતેઽપ્યેવમજાદ્વયાક્ષરે વિકલ્પયન્તઃ સદસચ્ ચ જન્મભિઃ ।
US-P19.019cd સ્વચિત્તમાયાપ્રભવં ચ તે ભવં જરાં ચ મૃત્યું ચ નિયાન્તિ સંતતમ્ ॥

US-P19.020ab ભવાભવત્વં તુ ન ચેદવસ્થિતિર્ન તસ્ય ચાન્યસ્ત્વિતિ જન્મ નાન્યથા ।
US-P19.020cd સતો હ્યસત્ત્વાદસતશ્ચ સત્ત્વતો ન ચ ક્રિયા કારકમિત્યતોઽપ્યજમ્ ॥

US-P19.021ab અકુર્વદિષ્ટં યદિ વાસ્ય કારકં ન કિંચિદન્યન્ નનુ નાસ્ત્યકારકમ્ ।
US-P19.021cd સતો વિશેષાદસતશ્ચ સચ્ચ્યુતૌ તુલાન્તયોર્યદ્વદનિશ્ચયાન્ ન હિ ॥

US-P19.022ab ન ચેત્ સ ઇષ્ટઃ સદસદ્વિપર્યયઃ કથં ભવઃ સ્યાત્ સદસદ્વ્યવસ્થિતૌ ।
US-P19.022cd વિભક્તમેતદ્ દ્વયમપ્યવસ્થિતં ન જન્મ તસ્માચ્ ચ મનો હિ કસ્યચિત્ ॥

US-P19.023ab અથાભ્યુપેત્યાપિ ભવં તવેચ્છતો બ્રવીમિ નાર્થસ્તવ ચેષ્ટિતેન મે ।
US-P19.023cd ન હાનવૃદ્ધી ન યતઃ સ્વતોઽસતો ભવોઽન્યતો વા યદિ વાસ્તિતા તયોઃ ॥

US-P19.024ab ધ્રુવા હ્યનિત્યાશ્ચ ન ચાન્યયોગિનો મિથશ્ચ કાર્યં ન ચ તેષુ યુજ્યતે ।
US-P19.024cd અતો ન કસ્યાપિ હિ કિંચિદિષ્યતે સ્વયં હિ તત્ત્વં ન નિરુક્તિગોચરમ્ ॥

US-P19.025ab સમં તુ તસ્માત્ સતતં વિભાતવદ્ દ્વયાદ્ વિમુક્તં સદસદ્વિકલ્પિતાત્ ।
US-P19.025cd નિરીક્ષ્ય યુક્ત્યા શ્રુતિતશ્ચ બુદ્ધિમાનશેષનિર્વાણમુપૈતિ દીપવત્ ॥

US-P19.026ab અવેદ્યમેકં યદનન્યવેદિનાં કુતાર્કિકાણાં ચ સુવેદ્યમન્યથા ।
US-P19.026cd નિરીક્ષ્ય ચેત્થં ત્વગુણગ્રહોઽગુણં ન યાતિ મોહં ગ્રહદોષમુક્તિતઃ ॥

US-P19.027ab અતોઽન્યથા ન ગ્રહનાશ ઇષ્યતે વિમોહબુદ્ધેર્ગ્રહ એવ કારણમ્ ।
US-P19.027cd ગ્રહોઽપ્યહેતુર્હ્યનલસ્ત્વનિન્ધનો યથા પ્રશાન્તિં પરમાં તથા વ્રજેત્ ॥

US-P19.028ab વિમથ્ય વેદોદધિતઃ સમુદ્ધૃતં સુરૈર્મહાબ્ધેસ્તુ યથા મહાત્મભિઃ ।
US-P19.028cd તથાઽમૃતં જ્ઞાનમિદં હિ યૈઃ પુરા નમો ગુરુભ્યઃ પરમિક્ષિતં ચ યૈઃ ॥

(Prose SectionsI-III)

અથ મોક્ષસાધનોપદેશવિધિં વ્યાખ્યાસ્યામો મુમુક્ષૂણાં
શ્રદ્દધાનાનામર્થિનામર્થાય ॥ ૧॥

તદિદં મોક્ષસાધનં જ્ઞાનં સાધનસાધ્યાદનિત્યાત્ સર્વસ્માદ્ વિરક્તાય
ત્યક્તપુત્રવિત્તલોકૈષણાય પ્રતિપન્નપરમહંસપારિવ્રાજ્યાય
શમદમદયાદિયુક્તાય શાસ્ત્રપ્રસિદ્ધશિષ્યગુણસમ્પન્નાય શુચયે બ્રાહ્મણાય
વિધિવદુપસન્નાય શિષ્યાય જાતિકર્મવૃત્તવિદ્યાભિજનૈઃ પરીક્ષિતાય બ્રૂયાત્
પુનઃ પુનર્યાવદ્ ગ્રહણં દૃઢીભવતિ ॥ ૨॥

શ્રુતિશ્ચ – oક઼્ પરીક્ષ્ય ... તત્ત્વતો બ્રહ્મવિદ્યાંcક઼્ ઇતિ ।
દૃઢગૃહીતા હિ વિદ્યાત્મનઃ શ્રેયસે સન્તત્યૈ ચ ભવતિ । વિદ્યાસન્તતૈશ્ચ
પ્રાણ્યનુગ્રહાય ભવતિ નૌરિવ નદીં તિતીર્ષોઃ । શાસ્ત્રં ચ – oક઼્ યદ્યપિ
અસ્મા ઇમામદ્ભિઃ પરિગૃહીતાં ધનસ્ય પૂર્ણાં દદ્યાદેતદેવ તતો ભૂયઃcક઼્ ઇતિ
। અન્યથા ચ જ્ઞાનપ્રાપ્ત્યભાવાત્ – oક઼્ આચાર્યવાન્ પુરુષો વેદcક઼્ oક઼્
આચાર્યાદ્ ધૈવ વિદ્યા વિદિતા (સાધિષ્ઠં પ્રાપત્) cક઼્ oક઼્ આચાર્યઃ પ્લાવયિતા
તસ્ય (સમ્યગ્) જ્ઞાનં પ્લવ ઇહોચ્યતેcક઼્ ઇત્યાદિશ્રુતિભ્યઃ સ્મૃતિભ્યશ્ચ ॥
૩॥

શિષ્યસ્ય જ્ઞાનગ્રહણં ચ લિન્ગૈર્બુદ્ધ્વા
તદગ્રહણહેતૂનધર્મલૌકિકપ્રમાદનિત્યાનિત્ય(વસ્તુ)

વિવેકવિષયાસંજાતદૃઢપૂર્વશ્રુતત્વલોકચિન્તાવેક્ષણજાત્યાદ્યભિમાનાદીંસ્તત્
પ્રતિપક્ષૈઃ શ્રુતિસ્મૃતિવિહિતૈરપનયેદક્રોધાદિભિરહિંસાદિભિશ્ચ
યમૈર્જ્ઞાનાવિરુદ્ધૈશ્ચ નિયમૈઃ ॥ ૪॥

અમાનિત્વાદિગુણં ચ જ્ઞાનોપાયં સમ્યગ્ ગ્રાહયેત્ ॥ ૫॥

આચાર્યાશ્ચોહાપોહગ્રહણધારણશમદમદયાનુગ્રહાદિસમ્પન્નો લબ્ધાગમો
દૃષ્ટાદૃષ્ટભોગેષ્વનાસક્તસ્ત્યક્તસર્વકર્મસાધનો બ્રહ્મવિદ્ બ્રહ્મણિ
સ્થિતોઽભિન્નવૃત્તો
દમ્ભદર્પકુહકશાઠ્યમાયામાત્સર્યાનૃતાહંકારમમત્વાદિદોષવર્જિતઃ
કેવલપરાનુગ્રહપ્રયોજનો વિદ્યોપયોગાર્થી પૂર્વમુપદિશેત્ – ૦ક઼્ સદેવ
સોમ્યેદમગ્ર આસીદેકમેવાદ્વિતીયંcક઼્ ૦ક઼્ યત્ર નાન્યત્ પશ્યતિcક઼્ ૦ક઼્ આત્મા વા
ઇદમેક એવાગ્ર આસીત્cક઼્ ૦ક઼્ સર્વં ખલ્વિદં બ્રહ્મcક઼્ ઇત્યૂ(આદ્યઃ)
આત્મૈકત્વપ્રતિપાદનપરાઃ શ્રુતીઃ ॥ ૬॥

ઉપદિશ્ય ચ ગ્રાહયેદ્ બ્રહ્મણો લક્ષણં – ૦ક઼્ ય આત્માપહતપાપ્માcક઼્ ૦ક઼્
યત્ સાક્ષાદપરોક્ષાદ્ બ્રહ્મcક઼્ ૦ક઼્ યોઽનાત્મ્યેcક઼્ ૦ક઼્ સ વા એષઃcક઼્ ૦ક઼્
અપ્રાણો હ્યમનાઃcક઼્ ૦ક઼્ સબાહ્યાભ્યન્તરો હ્યજઃcક઼્ ૦ક઼્ વિજ્ઞાનઘન એવcક઼્
૦ક઼્ અનન્તરમબાહ્યંcક઼્ ૦ક઼્ અન્યદેવ તદ્ વિદિતાદથો અવિદિતાત્cક઼્ ૦ક઼્ આકાશો
વૈ નામcક઼્ ઇત્યાદિશ્રુતિભિઃ ॥ ૭॥

સ્મૃતિભિશ્ચ – ૦ક઼્ ન જાયતે મ્રિયતે વાcક઼્ ૦ક઼્ નાદત્તે કસ્યચિત્ પાપંcક઼્
૦ક઼્ યથાકાશસ્થિતો નિત્યંcક઼્ ૦ક઼્ ક્ષેત્રજ્ઞાં ચાપિ માં વિદ્ધિcક઼્ ૦ક઼્ ન
સત્ તન્ નાસદુચ્યતેcક઼્ ૦ક઼્ અનાદિત્વાન્ નિર્ગુણત્વાત્cક઼્ ૦ક઼્ સમં સર્વેષુ
ભૂતેષુcક઼્ ૦ક઼્ ઉત્તમઃ પુરુષઃcક઼્ ઇત્યાદિભિઃ
શ્રુત્યુક્તલક્ષણાવિરુદ્ધાભિઃ પરમાત્માસંસારિત્વપ્રતિપાદનપરાભિઃ તસ્ય
સર્વેણાનન્યત્વપ્રતિપાદનપરાભિશ્ચ ॥ ૮॥

એવં શ્રુતિસ્મૃતિભિર્ગૃહિતપરમાત્મલક્ષણં શિષ્યં
સંસારસાગરાદુત્તિતીર્ષું પૃચ્છેત્ – કસ્ત્વમસિ સોમ્યેતિ ॥ ૯॥

સ યદિ બ્રૂયાત્ – બ્રાહ્મણપુત્રોઽદોન્વયો બ્રહ્મચાર્યાસં ગૃહસ્થો વેદાનીમસ્મિ
પરમહંસપરિવ્રાટ્ સંસારસાગરાજ્ જન્મમૃત્યુમહાગ્રહાદુત્તિતીર્ષુરિતિ ॥ ૧૦॥

આચાર્યો બ્રૂયાદ્ – ઇહૈવ તે સોમ્ય મૃતસ્ય શરીરં વયોભિરદ્યતે મૃદ્ભાવં
વાપદ્યતે તત્ર કથં સંસારસાગરાદત્તર્તુમિચ્છસીતિ ॥ ૧૧॥

સ યદિ બ્રૂયાત્ – અન્યોઽહં શરીરાત્ । શરીરં તુ જાયતે મ્રિયતે વયોભિરદ્યતે મૃદ્ભાવમાપદ્યતે શસ્ત્રાગ્ન્યાદિભિશ્ ચ વિનાશ્યતે વ્યાધ્યાધિભિશ્ચ યુજ્યતે । તસ્મિન્નહં સ્વસ્વકૃતધર્માધર્મવશાત્ પક્ષી નીદમિવ પ્રવિષ્ટઃ પુનઃ પુનઃ શરીરવિનાશે ધર્માધર્મવશાચ્છરીરાન્તરં યાસ્યામિ પૂર્વનીડવિનાશે પક્ષીવ નીડાન્તરમ્ । એવમેવાહમનાદૌ સંસારે દેવતિર્યઙ્મનુષ્યનિરયસ્થાનેષુ સ્વકર્મવશાદુપાત્તં શરીરં ત્યજન્ નવં નવં ચાન્યદુપાદદાનો જન્મમરણપ્રબન્ધચક્રે ઘટીયન્ત્રવત્ સ્વકર્મણા ભ્રામ્યમાણઃ ક્રમેણેદં શરીરમાસાદ્ય સંસારચક્રભ્રમણાદસ્માન્ નિર્વિણ્ણો ભગવન્તમુપસન્નોઽસ્મિ સંસારચક્રભ્રમણપ્રશમાયેતિ । તસ્માન્ નિત્ય એવાહં શરીરાદન્યઃ । શરીરાણ્યાગચ્છન્ત્યપગચ્છન્તિ ચ વાસાંષીવ પુરુષસ્યેતિ ॥

૧૨ ॥

આચાર્યો બ્રૂયાત્ – સાધ્વવાદીઃ સમ્યક્ પશ્યસિ । કથં મૃષાવાદીઃ બ્રાહ્મણપુત્રોઽદોન્વયો બ્રહ્મચર્યાસં ગૃહસ્થો વા ઇદાનીમસ્મિ પરમહંસપરિવ્રાડિતિ ॥ ૧૩ ॥

સ યદિ બ્રૂયાત્ – ભગવન્, કથમહં મૃષાવાદિષમિતિ ॥ ૧૪ ॥

તં પ્રતિ બ્રૂયાદાચાર્યઃ – યતસ્ત્વં ભિન્નજાત્યન્વયસંસ્કારં શરીરં જાત્યન્વયસંસ્કારવર્જિતસ્યાત્મનઃ પ્રત્યજ્ઞાસીર્બ્રાહ્મણપુત્રોઽદોન્વય ઇત્યાદિના વાક્યેનેતિ ॥ ૧૫ ॥

સ યદિ પૃચ્છેત્ – શ઼ૃણુ સોમ્ય યથેદં શરીરં ત્વત્તો ભિન્નં ભિન્નજાત્યન્વયસંસ્કારં ત્વં ચ જાત્યન્વયસંસ્કારવર્જિત ઇત્યુક્ત્વા તં સ્મારયેત્ – સ્મર્તુમર્હસિ સોમ્ય પરમાત્માનં સર્વાત્માનં યથોક્તલક્ષણં શ્રાવિતોઽસિ ૦ક઼્ સદેવ સોમ્યેદંcક઼્ ઇત્યાદિ(ભિઃ) શ્રુતિભિઃ સ્મૃતિભિશ્ચ । લક્ષણં ચ તસ્ય શ્રુતિભિઃ સ્મૃતિભિશ્ચ ॥ ૧૭ ॥

લબ્ધપરમાત્મલક્ષણસ્મૃતયે બ્રૂયાત્ – યોઽસાવાકાશનામા નામરૂપાભ્યામર્થાન્તરભૂતોઽશરીરોઽસ્થૂલાદિલક્ષણોઽપહતપાપ્મત્વાદિલક્ષણ્ અશ્ચ સર્વૈઃ સંસારધર્મૈરનાગન્ધિતઃ ૦ક઼્ યત્ સાક્ષાદપરોક્ષાદ્ બ્રહ્મ ... એષ ત આત્મા સર્વાન્તરઃcક઼્ ૦ક઼્ અદૃષ્ટો દ્રષ્ટા અશ્રુતઃ શ્રોતા અમતો મન્તા અવિજ્ઞાતો વિજ્ઞાતાcક઼્ નિત્યવિજ્ઞાનસ્વરૂપોઽનન્તરોઽબાહ્યઃ ૦ક઼્ વિજ્ઞાનઘન એવcક઼્ પરિપૂર્ણ આકાશવતનન્તશક્તિઃ આત્મા સર્વસ્ય, અશનાયાદિવર્જિતઃ, આવિર્ભાવતિરોભાવવર્જિતશ્ચ

સ્વાત્મવિલક્ષણયોર્નામરૂપયોર્જગદ્બીજભૂતયોઃ સ્વાત્મસ્થયોઃ
તત્ત્વાન્યત્વાભ્યામનિર્વચનીયયોઃ સ્વસંવેદ્યયોઃ સદ્ભાવમાત્રેણાચિન્ત્યશક્તિત્વાદ્
વ્યાકર્તાવ્યાકૃતયોઃ ॥ ૧૮॥

તે નામરૂપેઽવ્યાકૃતે સતિ વ્યાક્રિયમાણે તસ્માદેતસ્માદાત્મન આકાશનામાકૃતી
સંવૃત્તે । તચ્ ચાકાશાખ્યં ભૂતમનેન પ્રકારેણ પરમાત્મનઃ સમ્ભૂતં
પ્રસન્નાત્ સલિલાન્ મલમિવ ફેનમ્ । ન સલિલં ન ચ સલિલાદત્યન્તભિન્નં
ફેનમ્ । સલિલવ્યતિરેકેણાદર્શનાત્ । સલિલં તુ સ્વચ્છમન્યત્ ફેનાન્ મલરૂપાત્
। એવં પરમાત્મા નામરૂપાભ્યામન્યઃ ફેનાસ્થાનીયાભ્યાં શુદ્ધઃ
પ્રસન્નસ્તદ્વિલક્ષણઃ । તે નામરૂપેઽવ્યાકૃતે સતી વ્યાક્રિયમાણે ફેનસ્થાનીયે
આકાશનામાકૃતી સંવૃત્તે ॥ ૧૯॥

તતોઽપિ સ્થૂલભાવમાપદ્યમાને નામરૂપે વ્યાક્રિયમાણે વાયુભાવમાપદ્યેતે
તતોઽપ્યગ્નિભાવમગ્નેરભાવં તતઃ પૃથ્વીભાવમિત્યેવંક્રમેણ
પૂર્વપૂર્વો(ત્તરો) ત્તરાનુપ્રવેશેન પઞ્ચમહાભૂતાનિ પૃથિવ્યન્તાન્યુત્પન્નાનિ ।
તતઃ પઞ્ચમહાભૂતગુણવિશિષ્ટા પૃથ્(ઇ) વી । પૃથ્(ઇ) વ્યાશ્ચ પઞ્ચાત્મક્યો
વ્રીહિયવાદ્યા ઓષધયો જાયન્તે । તાભ્યો ભક્ષિતાભ્યો લોહિતં શુક્રં ચ
સ્ત્રીપુંસશરીરસંબન્ધિ જાયતે । તદુભયં
ઋતુકાલેઽવિદ્યાપ્રયુક્તકામખજનિર્મથનોદ્ભૂતં મન્ત્રસંસ્કૃતં ગર્ભાશયે
નિષિચ્યતે । તત્ સ્વયોનિરસાનુપ્રવેશેન વિવર્ધમાનં ગર્ભીભૂતં દશમે
નવમે વા માસિ  સઞ્જાયતે ॥ ૨૦॥

તજ્જાતં લબ્ધનામાકૃતિકં જાતકર્માદિભિર્મન્ત્રસંસ્કૃતં
પુનરુપનયનસંસ્કારયોગેન ગૃહસ્થસંજ્ઞં ભવતિ । તદેવ શરીરં
પત્નીસંયોગસંસ્કારયોગેન ગૃહસ્થસંજ્ઞં ભવતિ । તદેવ
વનસ્થસંસ્કારેણ તાપસસંજ્ઞં ભવતિ । તદેવ
ક્રિયાવિનિવૃત્તિનિમિત્તસંસ્કારેણ પરિવ્રાટ્સંજ્ઞં ભવતિ । ઇત્યેવં ત્વત્તો
ભિન્નં ભિન્નજાત્યન્વયસંસ્કારં શરીરમ્ ॥ ૨૧॥

મનશ્ચેન્દ્રિયાણિ ચ નામરૂપાત્મકાન્યેવ ૦ક઼્ અન્નમયં હિ સોમ્ય મનઃ૮ક઼્
ઇત્યાદિશ્રુતિભ્યઃ ॥ ૨૨॥

કથં ચાહં ભિન્નજાત્યન્વયસંસ્કારવર્જિત ઇત્યેતચ્છૃણુ । યોઽસૌ
નામરૂપયોર્વ્યાકર્તા નામરૂપધર્મવિલક્ષણઃ સ એવ નામરૂપે વ્યાકુર્વન્
સૃષ્ટ્વેદં શરીરં સ્વયં સંસ્કારધર્મવર્જિતો નામરૂપ ઇહ

પ્રવિષ્ટોઽન્યૈરદૃષ્ટઃ સ્વયં પશ્યંસ્તથાઽશ્રુતઃ શ઼ૃણ્વન્નમતો મન્વાનોઽવિજ્ઞાતો વિજાનં – oક઼્ સર્વાણિ રૂપાણિ વિચિત્ય ધીરો નામાનિ કૃત્વાભિવદન્ યદાસ્તેcક઼્ ઇતિ । અસ્મિન્નર્થે શ્રુતયઃ સહસ્રશઃ oક઼્ તત્ સૃષ્ટ્વા તદેવાનુપ્રાવિશત્cક઼્ oક઼્ અન્તઃ પ્રવિષ્ટઃ શાસ્તા જનાનાંcક઼્ oક઼્ સ એષ ઇહ પ્રવિષ્ટઃcક઼્ oક઼્ એષ ત આત્માcક઼્ oક઼્ સ એતમેવ સીમાનં વિદાર્યૈતયા દ્વારા પ્રાપદ્યતcક઼્ oક઼્ એષ સર્વેષુ ભૂતેષુ ગૂઢોઽત્માcક઼્ oક઼્ સેયં દેવતૈક્ષત હન્તાહમિમાસ્તિસ્રો દેવતાઃcક઼્ oક઼્ અશરીરં શરીરેષુcક઼્ ઇત્યાદ્યાઃ ॥ ૨૩ ॥

સ્મૃતયોઽપિ oક઼્ આત્મૈવ દેવતાઃ સર્વાઃcક઼્ oક઼્ નવદ્વારે પુરે દેહીcક઼્ oક઼્ ક્ષેત્રજ્ઞં ચાપિ માં વિદ્ધિcક઼્ oક઼્ સમં સર્વેષુ ભૂતેષુcક઼્ oક઼્ ઉપદ્રષ્ટાનુમન્તા ચcક઼્ oક઼્ ઉત્તમઃ પુરુષસ્ત્વન્યઃcક઼્ ઇત્યાદ્યાઃ । તસ્માજ્ જાત્યન્વયસંસ્કારવર્જિતસ્ત્વમિતિ સિદ્ધમ્ ॥ ૨૪ ॥

સ યદિ બ્રૂયાત્ – અન્ય એવાહમજ્ઞઃ સુખી દુઃખી બદ્ધઃ સંસારી, અન્યોઽસૌ મદ્વિલક્ષણોઽસંસારી દેવઃ, તમહં બલ્યુપહારનમસ્કારાદિભિર્વર્ણાશ્રમકર્મભિશ્ચારાધ્ય સંસારસાગરાદુત્તિતીર્ષુરસ્મિ કથમહં સ એવેતિ ॥ ૨૫ ॥

આચાર્યો બ્રૂયાત્ – નૈવં સોમ્ય પ્રતિપત્તુમર્હસિ પ્રતિષિદ્ધત્વાદ્ ભેદપ્રતિપત્તેઃ । કથં પ્રતિષિદ્ધા ભેદપ્રતિપત્તિરિત્યત આહ – oક઼્ અન્યોઽસાવન્યોઽહમસ્મીતિ ન સ વેદcક઼્ oક઼્ મૃત્યોઃ સ મૃત્યુમાપ્નોતિ ય ઇહ નાનેવ પશ્યતિcક઼્ ઇત્યેવમાદ્યાઃ ॥ ૨૬ ॥

એતા એવ શ્રુતયો ભેદપ્રતિપત્તેઃ સંસારગમનં દર્શયન્તિ ॥ ૨૭ ॥

અભેદપ્રતિપત્તેશ્ચ મોક્ષં દર્શયન્તિ સહસ્રશઃ – oક઼્ સ આત્મા તત્ ત્વમસિcક઼્ ઇતિ પરમાત્મભાવં વિધાય oક઼્ આચાર્યવાન્ પુરુષો વેદcક઼્ ઇત્યુક્ત્વા oક઼્ તસ્ય તાવદેવ ચિરંcક઼્ ઇતિ મોક્ષં દર્શયન્ત્યભેદવિજ્ઞાનાદેવ સત્યસન્ધસ્યાતસ્કરસ્યેવ દાહાદ્યભાવદૃષ્ટાન્તેન સંસારાભાવં દર્શયન્તિ ભેદદર્શનાદસત્યાભિસન્ધસ્ય સંસારગમનં દર્શયન્તિ તસ્કરસ્યેવ દાહાદિદૃષ્ટાન્તેન ॥ ૨૮ ॥

oક઼્ ત ઇહ વ્યાઘ્રો વાcક઼્ ઇત્યાદિના ચાભેદદર્શનાત્ oક઼્ (સ) સ્વરાડ્ ભવતિcક઼્ ઇત્યુક્ત્વા તદ્વિપઈતેન ભેદદર્શનેન સંસારગમનં દર્શયન્તિ – oક઼્ અથ યેઽન્યથાતો વિદુરન્યરાજાનસ્તે ક્ષય્યલોકા ભવન્તિcક઼્ ઇતિ પ્રતિશાખમ્ ।

તસ્માન્ મૃષૈવાવાદીઃ – બ્રાહ્મણપુત્રોઽદોન્વયઃ સંસારી પરમાત્મવિલક્ષણ ઇતિ ॥ ૨૯॥

તસ્માત્ પ્રતિસિદ્ધત્વાત્ ભેદદર્શનસ્ય ભેદવિષયત્વાચ્ ચ કર્મોપાદાનસ્ય, કર્મસાધનત્વાચ્ ચ યજ્ઞોપવીતાદેઃ કર્મસાધનોપાદાનસ્ય પરમાત્માભેદપ્રતિપત્ત્યા પ્રતિષેધઃ કૃતો વેદિતવ્યઃ । કર્મણાં તત્સાધનાનાં ચ યજ્ઞોપવીતાદીનાં પરમાત્માભેદપ્રતિપત્તિવિરુદ્ધત્વાત્ । સંસારિણો હિ કર્માણિ વિધીયન્તે તત્સાધનાનિ ચ યજ્ઞોપવીતાદીનિ ન પરમાત્મનોઽભેદદર્શિનઃ । ભેદદર્શનમાત્રેણ ચ તતોઽન્યત્વમ્ ॥ ૩૦॥

યદિ ચ કર્માણિ કર્તવ્યાનિ ન નિવર્તયિષિતાનિ કર્મસાધનાસમ્બન્ધિનઃ કર્મનિમિત્તજાત્યાશ્રમાદ્યસમ્બન્ધિનશ્ચ પરમાત્મન આત્મનૈવાભેદપ્રતિપત્તિં નાવક્ષ્યત્ ૦ક઼્ સ આત્મા તત્ ત્વમસિc઼્ ઇત્યેવમાદિભિર્નિશ્ચિતરૂપૈર્વાક્યૈર્ભેદપ્રતિપત્તિનિન્દાં ચ નાભ્યધાસ્યત્ ૦ક઼્ એષ નિત્યો મહિમા બ્રાહ્મણસ્યc઼્ ૦ક઼્ અનન્વાગતં પુણ્યેનાનન્વાગતં પાપેનc઼્ ૦ક઼્ અત્ર સ્તેનોઽસ્તેનc઼્ ઇત્યાદિના ॥ ૩૧॥

કર્માસમ્બન્ધરૂપત્વં કર્મનિમિત્તવર્ણાદ્યસમ્બન્ધરૂપતાં (ચ) નાભ્યધાસ્યત્ કર્માણિ (ચ) કર્મસાધનાનિ (ચ) યજ્ઞોપવીતાદીનિ યદ્યપરિતિત્યાજયિષિતાનિ । તસ્માત્ સસાધનં કર્મ પરિત્યક્તવ્યં મુમુક્ષુણા પરમાત્માભેદદર્શનવિરોધાત્ । આત્મા ચ પર એવેતિ પ્રતિપત્તવ્યો યથાશ્રુત્યુક્તલક્ષણઃ ॥ ૩૨॥

સ યદિ બ્રૂયાત્ – ભગવ્દહ્યમાને છિદ્યમાને વા દેહે પ્રત્યક્ષા વેદના, અશનાયાદિનિમિત્તં ચ પ્રત્યક્ષં દુઃખં મમ । પરશ્ચાત્મા ૦ક઼્ અપહતપાપ્મા વિજરો વિમૃત્યુર્વિશોકો વિજિઘત્સોઽપિપાસઃc઼્ સર્વસંસારધર્મવિવર્જિતઃ શ્રૂયતે સર્વશ્રુતિષુ સ્મૃતિષુ ચ । કથં તદ્વિલક્ષણોઽનેકસંસારધર્મસંયુક્તઃ પરમાત્માનમાત્મત્વેન માં ચ સંસારિણં પરમાત્મત્વેનાગ્નિમિવ શીતત્વેન પ્રતિપદ્યેયમ્ । સંસારિ ચ સન્ સર્વાભ્યુદયનિઃશ્રેયસસાધનેઽધિકૃતોઽભ્યુદયનિઃશ્રેયસસાધનાનિ કર્માણિ તત્સાધનનાનિ ચ યજ્ઞોપવીતાદીનિ કથં પરિયજેયમિતિ ॥ ૩૩॥

તં પ્રતિ બ્રૂયાત્ – યદવોચો દહ્યમાને વા દેહે પ્રત્યક્ષા વેદનોપલભ્યતે મમેતિ તદસત્ । કસ્માત્ । દહ્યમાને છિદ્યમાન ઇવ વૃક્ષ ઉપલબ્ધુરુપલભ્યમાને કર્મણિ શરીરે દાહચ્છેદવેદનાયા ઉપલભ્યમાનત્વાદ્ દાહાદિસમાનાશ્રયૈવ વેદના । યત્ર હિ દાહઃ છેદો વા ક્રિયતે તત્રૈવ

વ્યપદિશતિ દાહાદિવેદનાં લોકો ન દાહાદ્યુપલબ્ધરીતિ । કથમ્ । ક્વ તે
વેદનેતિ પૃષ્ટઃ શિરસિ મે વેદનોરસ્યુદર ઇતિ યત્ર દાહાદિસ્તત્ર
વ્યપદિશતિ નોપલબ્ધરીતિ । યદ્યુપલબ્ધરિ વેદના સ્યાદ્ વેદનાનિમિત્તં વા
દાહચ્છેદાદિ વેદનાશ્રયત્વેનોપદિશેદ્ દાહાદ્યાશ્રયવત્ ॥ ૩૪॥

સ્વયં ચ નોપલભ્યેત ચક્ષુર્ગતરૂપવત્ । તસ્માદ્
દાહચ્છેદાદિસમાનાશ્રયત્વેનોપલભ્યમાનત્વાદ્ દાહાદિવત્ કર્મભૂતૈવ વેદના ।
ભાવરૂપત્વાચ્ ચ સાશ્રયા તણ્ડુલપાકવત્ । વેદનાસમાનાશ્રય એવ તત્સંસ્કારઃ ।
સ્મૃતિસમાનકાલ એવોપલભ્યમાનત્વાત્ । વેદનાવિષયસ્તન્નિમિત્તવિષયશ્ચ
દ્વેષોઽપિ સંસ્કારસમાનાશ્રય એવ । તથા ચોક્તં – 0ક઼◌્ રૂપસંસ્કારતુલ્યાધિ
રાગદ્વેષૌ ભયં ચ યત્ । ગૃહ્યતે ધીશ્રયં તસ્માજ્ જ્ઞાતા શુદ્ધોઽભયઃ
સદાcક઼◌્ ॥ ૩૫॥

કિમાશ્રયઃ પુના રૂપાદિસંસ્કારાદય ઇતિ । ઉચ્યતે । યત્ર કામાદયઃ । ક્વ પુનસ્તે
કામાદયઃ । 0ક઼◌્ કામઃ સઙ્કલ્પો વિચિકિત્સાcક઼◌્ ઇત્યાદિશ્રુતેર્બુદ્ધાવેવ ।
તત્રૈવ રૂપાદિસંસ્કારાદયોઽપિ 0ક઼◌્ કસ્મિન્ નુ રૂપાણિ પ્રતિષ્ઠિતાનીતિ
હૃદયેcક઼◌્ ઇતિ શ્રુતેઃ । 0ક઼◌્ કામા યેઽસ્ય હૃદિ શ્રિતાઃcક઼◌્ 0ક઼◌્ તીર્ણો હિcક઼◌્
0ક઼◌્ અસઙ્ગો હ્યયંcક઼◌્ 0ક઼◌્ તદ્ વા અસ્યૈતદતિચ્છન્દાઃcક઼◌્
ઇત્યાદિશ્રુતિશતેભ્યઃ 0ક઼◌્ અવિકાર્યોઽયમુચ્યતેcક઼◌્ 0ક઼◌્ અનાદિત્વાન્ નિર્ગુણત્વાત્cક઼◌્
ઇત્યાદિ – ઇચ્છાદ્વેષાદિ ચ ક્ષેત્રસ્યૈવ વિષયસ્ય ધર્મો નાત્મન ઇતિ –
સ્મૃતિભ્યશ્ચ કર્મસ્થૈવાશુદ્ધિર્નાત્મસ્થા ઇતિ ॥ ૩૬॥

અતો રૂપાદિસંસ્કારાદ્યશુદ્ધિસંબન્ધાભાવાન્ ન પરસ્માદાત્મનો વિલક્ષણસ્ત્વમિતિ
પ્રત્યક્ષાદિવિરોધાભાવાદ્ યુક્તં પર એવાત્માહમિતિ પ્રતિપત્તું – 0ક઼◌્
તદાત્માનમેવાવેદ્ (અહં બ્રહ્માસ્મિ) cક઼◌્ 0ક઼◌્ એકધૈવાનુમ્દ્રષ્ટવ્યંcક઼◌્ 0ક઼◌્
અહમેવાધસ્તાત્cક઼◌્ 0ક઼◌્ આત્મૈવાધસ્તાત્cક઼◌્ 0ક઼◌્ સર્વમાત્માનં પશ્યેત્cક઼◌્ 0ક઼◌્
યત્ર ત્વસ્ય સર્વમાત્મૈવcક઼◌્ 0ક઼◌્ ઇદં સર્વં યદયમાત્માcક઼◌્ 0ક઼◌્ સ એષો
('કલઃ) cક઼◌્ 0ક઼◌્ અનન્તરમબાહ્યંcક઼◌્ 0ક઼◌્ સબાહ્યાભ્યન્તરો હ્યજઃcક઼◌્ 0ક઼◌્
બ્રહ્મૈવેદંcક઼◌્ 0ક઼◌્ એતયા દ્વારા પ્રાપદ્યતcક઼◌્ 0ક઼◌્ પ્રજ્ઞાનસ્ય
નામધેયાનિcક઼◌્ 0ક઼◌્ સત્યં જ્ઞાનમનન્તં બ્રહ્મcક઼◌્ 0ક઼◌્ તસ્માદ્ વાcક઼◌્ 0ક઼◌્
તત્ સૃષ્ટ્વા તદેવાનુપ્રવિશત્cક઼◌્ 0ક઼◌્ એકો દેવઃ સર્વભૂતેષુ ગુઢઃcક઼◌્ 0ક઼◌્
અશરીરં શરીરેષુcક઼◌્ 0ક઼◌્ ન જાયતે મ્રિયતેcક઼◌્ 0ક઼◌્ સ્વપ્રાન્તં
જાગરિતાન્તંcક઼◌્ 0ક઼◌્ સ મ આત્મેતિ વિદ્યાત્cક઼◌્ 0ક઼◌્ યસ્તુ સર્વાણિ ભૂતાનિcક઼◌્
0ક઼◌્ તદેજતિ તન્ નૈજતિcક઼◌્ 0ક઼◌્ વેનસ્તત્ પશ્યન્cક઼◌્ 0ક઼◌્ તદેવાગ્નિઃcક઼◌્ 0ક઼◌્

અહં મનુરભવં સૂર્યશ્ચcક઼ૅ્ oક઼ૅ્ અન્તઃ પ્રવિષ્ટઃ શાસ્તા જનાનાંcક઼ૅ્ oક઼ૅ્
સદેવ સોમ્યcક઼ૅ્ oક઼ૅ્ તત્ સત્યં સ આત્મા તત્ ત્વમસિcક઼ૅ્ ઇત્યાદિશ્રુતિભ્યઃ ॥

૩૭ ॥

સ્મૃતિભ્યશ્ચ – oક઼ૅ્ પૂઃ પ્રાણિનઃ ... ગુહાશયસ્યcક઼ૅ્ oક઼ૅ્ આત્મૈવ
દેવતાઃcક઼ૅ્ oક઼ૅ્ નવદ્વારે પુરેcક઼ૅ્ oક઼ૅ્ સમં સર્વેષુ ભૂતેષુcક઼ૅ્ oક઼ૅ્
વિદ્યાવિનયસમ્પન્નેcક઼ૅ્ oક઼ૅ્ અવિભક્તં વિભક્તેષુcક઼ૅ્ oક઼ૅ્ વાસુદેવઃ સર્વcક઼ૅ્
ઇત્યાદિભ્યઃ, એક એવાત્મા પરં બ્રહ્મ (સર્વ) સંસારધર્મવિનિર્મુક્તસ્ત્વમિતિ
સિદ્ધમ્ ॥ ૩૮ ॥

સ યદિ બ્રૂયાત્ – યદિ ભગવન્ oક઼ૅ્ અનન્તરોઽબાહ્યઃcક઼ૅ્ oક઼ૅ્ સબાહ્યાભ્યન્તરો
હ્યજઃcક઼ૅ્ oક઼ૅ્ કૃત્સ્નઃ પ્રજ્ઞાનઘન એવcક઼ૅ્ સૈન્ધવઘનવદાત્મા
સર્વમૂર્તિભેદવર્જિત આકાશવદેકરસઃ કિમિદં દૃશ્યતે શ્રૂયતે વા સાધ્યં
સાધનં (વા) સાધકશ્ચેતિ શ્રુતિસ્મૃતિલોકપ્રસિદ્ધં
વાદિશતવિપ્રતિપત્તિવિષય ઇતિ ॥ ૩૯ ॥

આચાર્યો બ્રૂયાત્ – અવિદ્યાકૃતમેતદ્ યદિદં દૃશ્યતે શ્રૂયતે વા
પરમાર્થતસ્ત્વેક અવાત્મા અવિદ્યાદૃષ્ટેરનેકવદવભાસતે
તિમિરદૃષ્ટ્યાનેકચન્દ્રવત્ । oક઼ૅ્ યત્ર વાન્યદિવ સ્યાત્cક઼ૅ્ oક઼ૅ્ યત્ર હિ
દ્વૈતમિવ ભવતિ ઇતર ઇતરં પશ્યતિcક઼ૅ્ oક઼ૅ્ મૃત્યોઃ સ મૃત્યુમાપ્નોતિcક઼ૅ્
oક઼ૅ્ અથ યત્રાનુઅત્ પશ્યત્યન્યચ્છૃણોત્યન્યદ્ વિજાનાતિ તદલ્પં ... અથ
યદલ્પં તન્ મર્ત્યંcક઼ૅ્ ઇતિ oક઼ૅ્ વાચારમ્ભણં વિકારો નામધેયંcક઼ૅ્ (oક઼ૅ્
અનૃતંcક઼ૅ્ ) oક઼ૅ્ અન્યોઽસાવન્યોઽહંcક઼ૅ્ ઇતિ
ભેદદર્શનનિન્દોપપત્તેરવિદ્યાકૃતં દ્વૈતં oક઼ૅ્ એકમેવાદ્વિતીયંcક઼ૅ્ oક઼ૅ્
યત્ર ત્વસ્યcક઼ૅ્ oક઼ૅ્ કો મોહઃ કઃ શોકઃcક઼ૅ્ ઇત્યાદ્યેકત્વવિધિશ્રુતિભ્યશ્ચેતિ
॥ ૪૦ ॥

યદ્યેવં ભગવન્, કિમર્થં શ્રુત્યા સાધ્યસાધનાદિભેદ ઉચ્યતે ઉત્પત્તિઃ
પ્રલયશ્ચેતિ ॥ ૪૧ ॥

અત્રોચ્યતે – અવિદ્યાવત ઉપાત્તશરીરાદિભેદસ્યેષ્ટાનિષ્ટયોગિનમાત્માનં
મન્યમાનસ્ય સાધનૈરેવેષ્ટાનિષ્ટપ્રાપ્તિપરિહારોપાયવિવેકમજાનત ઇષ્ટપ્રાપ્તિં
ચાનિષ્ટપરિહારં ચેચ્છતઃ શનૈસ્તદ્વિષયમજ્ઞાનં નિવર્તયતિ શાસ્ત્રં ન
સાધ્યસાધનાદિભેદં વિધત્તે । અનિષ્ટરૂપઃ સંસારો હિ સ ઇતિ તદ્
ભેદદૃષ્ટિમેવાવિદ્યાં સંસારમૂલમુન્મૂલયતિ

ઉત્પત્તિપ્રલયાદ્યેકત્વોપપત્તિપ્રદર્શનેન ॥ ૪૨॥

અવિદ્યાયામુન્મૂલ્તિતાયાં શ્રુતિસ્મૃતિન્યાયેભ્યઃ ૦ક઼્ અનન્તરમબાહ્યંcક઼્ ૦ક઼્
સબાહ્યાભ્યન્તરો હ્યજઃcક઼્ સૈંધવઘનવત્ ૦ક઼્ પ્રજ્ઞાનઘન એવcક઼્
એકરસ આત્મા આકાશવત્ પરિપૂર્ણ ઇત્યત્રૈવૈકા પ્રજ્ઞા પ્રતિષ્ઠિતા
પરમાર્થદર્શિનો ભવતિ ન
સાધ્યસાધનોત્પત્તિપ્રલયાદિભેદેનાશુદ્ધિગન્ધોઽપ્યુપપદ્યતે ॥ ૪૩॥

તચ્ ચૈતત્ પરમાર્થદર્શનં પ્રતિપત્તુમિચ્છતા
વર્ણાશ્રમાદ્યભિમાનકૃતપાઙ્ક્તરૂપપુત્રવિત્તલોકૈષણાદિભ્યો વ્યુત્થાનં
કર્તવ્યમ્ । સમ્યક્પ્રત્યયવિરોધાત્ તદભિમાનસ્ય
ભેદદર્શનપ્રતિષેધાર્થોપપત્તિશ્ચોપપદ્યતે । ન
હ્યેકસ્મિન્નાત્મન્યસંસારિત્વબુદ્ધૌ શાસ્ત્રન્યાયોત્પાદિતાયાં તદ્વિપરીતા
બુદ્ધિર્ભવતિ । ન હ્ય્ અગ્નૌ શિતત્વબુદ્ધિઃ, શરીરે વાજરામરણબુદ્ધિઃ ।
તસ્માદવિદ્યાકાર્યત્વાત્ સર્વકર્મણાં તત્સાધનાનાં ચ યજ્ઞોપવીતાદીનાં
પરમાર્થદર્શનિષ્ટેન ત્યાગઃ કર્તવ્યઃ ॥ ૪૪॥

ઇતિ શિષ્યપ્રતિબોધન(વિધિ) પ્રકરણમ્ ॥ ૧॥

સુખમાસીનં બ્રાહ્મણં બ્રહ્મનિષ્ટં કશ્ચિદ્ બ્રહ્મચારી જન્મમરણલક્ષણાત્
સંસારાન્ નિર્વિણ્ણો મુમુક્ષુર્વિધિવદુપસન્નઃ પપ્રચ્છ – ભગવન્, કથમહં
સંસારાન્ મોક્ષિષ્યે । શરીરેન્દ્રિયવિષયવેદનાવાન્ જાગરિતે દુઃખમનુભવામિ
તથા સ્વપ્નેઽનુભવામિ પુનઃ પુનઃ સુષુપ્તિપ્રતિપત્ત્યા વિશ્રમ્ય । કિમયમેવ
મમ સ્વભાવઃ, કિં વાન્યસ્વભાવસ્ય સતો નૈમિત્તિક ઇતિ । યદિ સ્વભાવો ન મે
મોક્ષાશા સ્વભાવસ્યાવર્જનીયત્વાત્ । અથ નૈમિત્તિકો નિમિત્તપરિહારે સ્યાન્
મોક્ષોપપત્તિઃ ॥ ૪૫॥

તં ગુરુરુવાચ – શ઼ૃણુ વત્સ ન તવાયં સ્વભાવઃ । નૈમિત્તિકઃ ॥ ૪૬॥

ઇત્યુક્તઃ શિષ્ય ઉવાચ – કિં નિમિત્તમ્, કિં વા તસ્ય નિવર્તિકમ્, કો વા મમ
સ્વભાવઃ, યસ્મિન્ નિમિત્તે નિવર્તિતે નૈમિત્તિકાભાવઃ, રોગનિમિત્તનિવૃત્તાવિવ
રોગી સ્વભાવં પ્રતિપદ્યેયેતિ ॥ ૪૭॥

ગુરુરુવાચ – અવિદ્યા નિમિત્તં વિદ્યા તસ્યા નિવર્તિકા, અવિદ્યાયાં નિવર્તાયાં
તન્નિમિત્તાભાવાન્ મોક્ષ્યસે જન્મમરણલક્ષણાત્ સંસારાત્ સ્વપ્નજાગ્રદ્દુઃખં ચ
નાનુભવિષ્યસીતિ ॥ ૪૮॥

શિષ્ય ઉવાચ – કા સાવિદ્યા કિંવિષયા વા વિદ્યા ચ કાવિદ્યાનિવર્તિકા યયા સ્વભાવં પ્રતિપદ્યેયેતિ ॥ ૪૯॥

ગુરુરુવાચ – ત્વં પરમાત્માનં સન્તમસંસારિણં સંસાર્યહમસ્મીતિ વિપરીતં પ્રતિપદ્યસે, અકર્તારં સન્તં કર્તેતિ, અભોક્તારં સન્તં ભોક્તેતિ વિદ્યમાનં ચાવિદ્યમાનમિતિ, ઇયમવિદ્યા ॥ ૫૦॥

શિષ્ય ઉવાચ –યદ્યપ્યહં વિદ્યમાનસ્તથાપિ ન પરમાત્મા । કર્તૃત્વભોક્તૃત્વલક્ષણઃ સંસારો મમ સ્વભાવઃ પ્રત્યક્ષાદિભિઃ પ્રમાણૈરનુભૂયમાનત્વાત્ । નાવિદ્યાનિમિત્તઃ, અવિદ્યાયાઃ સ્વાત્મવિષયત્વાનુપપત્તેઃ । અવિદ્યા નામાન્યસ્મિન્નન્યધર્માધ્યારોપણા । યથા પ્રસિદ્ધં રજતં પ્રસિદ્ધાયાં શુક્તિકાયાં યથા પ્રસિદ્ધં પુરુષં સ્થાણાવધ્યારોપયતિ પ્રસિદ્ધં વા સ્થાણું પુરુષે । નાપ્રસિદ્ધં પ્રસિદ્ધે પ્રસિદ્ધં વાપ્રસિદ્ધે । ન ચાત્મન્યનાત્માનમધ્યારોપયતિ, આત્મનોઽપ્રસિદ્ધત્વાત્ । તથાત્મનમનાત્મનિ, આત્મનોઽપ્રસિદ્ધત્વાદેવ ॥ ૫૧॥

તં ગુરુરુવાચ – ન વ્યભિચારાત્ । ન હિ વત્સ પ્રસિદ્ધં પ્રસિદ્ધ એવાધ્યારોપયતીતિ નિયન્તું શક્યમ્ । આત્મન્યધ્યારોપણદર્શનાત્ । ગૌરોઽહં કૃષ્ણોઽહમિતિ દેહધર્મસ્યાહંપ્રત્યયવિષયસ્ય ચ દેહેઽયમહમસ્મીતિ ॥

૫૨॥

શિષ્ય આહ – પ્રસિદ્ધ એવ તર્હ્યાત્માહંપ્રત્યયવિષયતયા દેહશ્ચાયમિતિ । તત્રૈવં સતિ પ્રસિદ્ધયોરેવ દેહાત્મનોરિતરેતરાધ્યારોપણા(ત્) સ્થાણુપુરુષયોઃ શુક્તિકારજતયોરિવ । તત્ર કં વિશેષમાશ્રિત્ય ભગવતોક્તં પ્રસિદ્ધયોરિતરેતરાધ્યારોપણેતિ નિયન્તું ન શક્યત ઇતિ ॥ ૫૩॥

ગુરુરુવાચ – શ‍ૃણુ । સત્યં પ્રસિદ્ધૌ દેહાત્માનૌ ન તુ સ્થાણુપુરુષાવિવ વિવિક્તપ્રત્યયવિષયતયા સર્વલોકપ્રસિદ્ધૌ । કથં તર્હિ । નિત્યમેવ નિરન્તરાવિવિક્તપ્રત્યયવિષયતયા । ન હ્યયં દેહોઽયમાત્મેતિ વિવિક્તાભ્યાં પ્રત્યયાભ્યાં દેહાત્માનૌ ગૃહ્ણાતિ યતઃ કશ્ચિત્ । અત એવ હિ મોમુહ્યતે લોક આત્માનાત્મવિષયે, એવમાત્મા નૈવમાત્મેતિ । ઇમં વિશેષમાશ્રિત્યાવોચં નૈવં શક્યમિતિ ॥ ૫૪॥

નન્વવિદ્યાધ્યારોપિતં (યત્ર) યત્ તદસત્ (તત્ર) દૃષ્ટં યથા રજતં શુક્તિકાયાં, સ્થાનૌ પુરુષઃ રજ્જ્વાં સર્પઃ, આકાશે તલમલિનત્વમિત્યાદિ । તથા દેહાત્મનોરપિ નિત્યમેવ નિરન્તરાવિવિક્તપ્રત્યયતયેતરેતરાધ્યારોપણા

કૃતા સ્યાત્ તદિતરેતરયોર્નિત્યમેવાસત્ત્વં સ્યાત્ । યથા
શુક્તિકાદિષ્વવિદ્યાધ્યારોપિતાનાં રજતાદીનાં નિત્યમેવાત્યન્તાસત્ત્વં,
તદ્વિપરીતાનાં ચ વિપરીતેષુ તદ્વદ્ દેહાત્મનોરસત્ત્વં પ્રસજ્યેત ।
તચ્ચાનિષ્ટં પ્રત્યક્ષાદિવિરોધાત્ । તસ્માદ્ દેહાત્માનૌ
નાવિદ્યયેતરેતરસ્મિન્નધ્યારોપિતૌ । કથં તર્હિ । વંશસ્તમ્ભવન્
નિત્યસંયુક્તૌ ॥ ૫૫॥

ન । અનિત્યત્વપરાર્થત્વપ્રસઙ્ગાત્ । સંહતત્વાત્ (પરાર્થત્વમનિત્યત્વં ચ)
વંશસ્તમ્ભાદિવદેવ । કિં ચ  યસ્તુ પરૈર્દેહેન સંહતઃ આત્મા સ સંહતત્વાત્
પરાર્થઃ । તેનાસંહતઃ પરોઽન્યો નિત્યઃ સિદ્ધસ્તાવત્ ॥ ૫૬॥

તસ્યાસંહતસ્ય દેહે દેહમાત્રતયાધ્યારોપિતત્વેનાસત્ત્વાનિત્યત્વાદિદોષપ્રસઙ્ગો
ભવતિ । તત્ર નિરાત્મકો દેહ ઇતિ વૈનાશિકપક્ષપ્રાપ્તિદોષઃ સ્યાત્ ॥ ૫૭॥

ન । સ્વત એવાત્મન આકાશસ્યેવાસંહતત્વાભ્યુપગમાત્ । સર્વેણાસંહતઃ
સન્નાત્મેતિ ન નિરાત્મકો દેહાદિઃ સર્વઃ સ્યાત્ । યથા ચાકાશં સર્વેણાસંહતમિતિ
ન નિરાકાશં ભવતિ, એવમ્ । તસ્માન્ ન વૈનાશિકપક્ષપ્રાપ્તિદોષઃ સ્યાત્ ॥

૫૮॥

યત્ પુનરુક્તં દેહસ્યાત્મન્યસત્ત્વે પ્રત્યક્ષાદિવિરોધઃ સ્યાદિતિ । તન્ન ।
પ્રત્યક્ષાદિભિરાત્મનિ દેહસ્ય સત્ત્વાનુપલબ્ધેઃ । ન હ્યાત્મનિ કુણ્ડે બદરં
ક્ષિરે સર્પિઃ તિલે તૈલં ભિત્તૌ ચિત્રમિવ ચ પ્રત્યક્ષાદિભિર્દેહ ઉપલભ્યતે
। તસ્માન્ ન પ્રત્યક્ષાદિવિરોધઃ ॥ ૫૯॥

કથં તર્હિ પ્રત્યક્ષાદ્યપ્રસિદ્ધાત્મનિ દેહાધ્યારોપણા દેહે ચાત્મારોપણા ॥ ૬૦॥

નાયં દોષઃ । સ્વભાવ(પ્ર) સિદ્ધત્વાદાત્મનઃ । ન હિ
કાદાચિત્કસિદ્ધાવેવાધ્યારોપણા ન નિત્યસિદ્ધાવિતિ નિયન્તું શક્યમાકાશે
તલમલાદ્યધ્યારોપણદર્શનાત્ ॥ ૬૧॥

કિં ભગવ્દેહાત્મનોરિતરેતરાધ્યારોપણા દેહાદિસંઘાતકૃતાથવાત્મકૃતેતિ
॥ ૬૨॥

ગુરુરુવાચ – યદિ દેહાદિસંઘાતકૃતા યદિ વાત્મકૃતા કિં તવ સ્યાત્ ॥ ૬૩॥

ઇત્યુક્તઃ શિષ્ય આહ – યદ્યહં દેહાદિસંઘાતમાત્રઃ તતો મમાચેતનત્વાત્
પરાર્થત્વમિતિ ન મત્કૃતા દેહાત્મનોરિતરેતરાધ્યારોપણા । અથાહમાત્મા
પરોઽન્યઃ સંઘાતાત્ ચિતિમત્ત્વાત્ સ્વર્થ ઇતિ મયૈવ ચિતિમતાત્મન્યધ્યારોપણા

ક્રિયતે સર્વાનર્થબીજભૂતા ॥ ૬૪॥

ઇત્યુક્તો ગુરુરુવાચ – અનર્થબીજભૂતાં ચેત્ મિથ્યાધ્યારોપણાં જાનીષે મા કાર્ષીસ્તર્હિ ॥ ૬૫॥

નૈવ ભગવન્ શક્નોમિ ન કર્તુમ્ । અન્યેન કેનચિત્ પ્રયુક્તોઽહં ન સ્વતન્ત્ર ઇતિ ॥ ૬૬॥

ન તર્હ્યચિતિમત્ત્વાત્ સ્વાર્થસ્ત્વમ્ । યેન પ્રયુક્તોઽસ્વતન્ત્રઃ પ્રવર્તસે સ ચિતિમાન્ સ્વાર્થઃ સંઘાત એવ ત્વમ્ ॥ ૬૭॥

યદ્યચેતનોઽહં કથં સુખદુઃખવેદનાં ભવદુક્તં ચ જાનામિ ॥ ૬૮॥

ગુરુરુવાચ – કિં સુખદુઃખવેદનાયા મદુક્તાચ્ચાન્યસ્ત્વં કિં વાનન્ય એવેતિ ॥

૬૯॥

શિષ્ય ઉવાચ – નાહં તાવદનન્યઃ । કસ્માત્ । યસ્માત્ તદુભયં કર્મભૂતં ઘટાદિમિવ જાનામિ । યદ્યનન્યોઽહં તેન તદુભયં ન જાનીયાં કિં તુ જાનામિ તસ્માદન્યઃ । સુખદુઃખવેદનાવિક્રિયા ચ સ્વાર્થૈવ પ્રાપ્નોતિ ત્વદુક્તં ચ સ્યાત્ અનન્યત્વે ન ચ તયોઃ સ્વાર્થતા યુક્તા । ન હિ ચન્દનકણ્ટકકૃતે સુખદુઃખે ચન્દનકણ્ટકાર્થે ઘટોપયોગો વા ઘટાર્થઃ । તસ્માત્ તદ્વિજ્ઞાતુર્મમ ચન્દનાદિકૃતોઽર્થઃ । અહં હિ તતોઽન્યઃ સમસ્તમર્થં જાનામિ બુદ્ધ્યારૂઢમ્ ॥ ૭૦॥

તં ગુરુરુવાચ – એવં તર્હિ સ્વાર્તસ્ત્વં ચિતિમત્ત્વાન્ ન પરેણ પ્રયુજ્યતે ચિતિમતશ્ચિતિમદર્થત્વાનુપપત્તેઃ સમત્વાત્ પ્રકાશયોરિવ । નાપ્યચિતિમદર્થત્વાનુપપત્તેઃ સમત્વાત્ પ્રકાશયોરિવ । નાપ્યચિતિમદર્થત્વં ચિતિમતો ભવતિ અચિતિમતોઽચિતિમત્ત્વાદેવ સ્વાર્થસંબન્ધાનુપપત્તેઃ । નાપ્યચિતિમતોરન્યોન્યાર્થત્વં દૃષ્ટમ્ । ન હિ કાષ્ઠકુડ્યેઽન્યોન્યાર્થં કુર્વાતે ॥ ૭૧॥

નનુ ચિતિમત્ત્વે સમેઽપિ ભૃત્યસ્વામિનોરન્યોન્યાર્થત્વં દૃષ્ટમ્ ॥ ૭૨॥

નૈવમગ્નેરુષ્ણપ્રકાશવત્ તવ ચિતિમત્ત્વસ્ય વિવક્ષિતત્વાત્ । દર્શિતશ્ચ દૃષ્ટાન્તઃ પ્રકાશયોરિવેતિ । તત્રૈવં સતિ સ્વબુદ્ધ્યારૂઢમેવ સર્વમુપલભસેઽગ્ન્યુષ્ણપ્રકાશતુલ્યેન કૂટસ્થનિત્યચિતન્યસ્વરૂપેણ । યદિ ચૈવમાત્મનઃ સર્વદા નિર્વિષેશત્વમભ્યુપગચ્છસિ । કિમિત્યૂચિવાન્ સુષુપ્તે વિશ્રમ્ય વિશ્રમ્ય જાગ્રત્સ્વપ્નયોર્દુઃખમનુભવામિ । કિમયમેવ મમ સ્વભાવઃ

કિં વા નૈમિત્તિક ઇતિ ચ । કિમસૌ વ્યામોહઽપગતઃ કિં વા ન ॥ ૭૩॥

ઇત્યુક્તઃ શિષ્ય ઉવાચ – ભગવનપગતસ્ત્વત્પ્રસાદાદ્ વ્યામોહઃ કિં તુ મમ કૂટસ્થતાયાં સંશયઃ । કથમ્ । શબ્દાદિનાં સ્વતઃસિદ્ધિર્નાસ્તિ અચેતનત્વાત્ । શબ્દાદ્યાકારપ્રત્યયોત્પત્તેસ્તુ તેષમ્ । પ્રત્યયાનામિતરેતરવ્યાવૃત્તવિશેષણાનાં નીલપીતાદ્યાકારવતાં સ્વતઃસિદ્ધ્યસંભવાત્ । તસ્માદ્ બાહ્યાકારનિમિત્તત્વં ગમ્યત ઇતિ બાહ્યાકારવચ્છબ્દાદ્યાકારત્વસિદ્ધિઃ । તથા પ્રત્યયાનામપ્યહં પ્રત્યયાલમ્બનવસ્તુભેદાનાં સંહતત્વાદચૈતન્યોપપત્તેઃ સ્વાર્થત્વાસંભવાત્ સ્વરૂપવ્યતિરિક્તગ્રાહકગ્રાહ્યત્વેન સિદ્ધિઃ શબ્દાદિવદેવ । અસંહતત્વે સતિ ચૈતન્યાત્મકત્વાત્ સ્વાર્થોઽપ્યહં પ્રત્યયાનાં નીલપીતાદ્યાકારાણામુપલબ્ધેતિ વિક્રિયાવાનેવ કૂટસ્થ ઇતિ સંશયઃ ॥ ૭૪॥

તં ગુરુરુવાચ – ન યુક્તસ્તવ સંશયઃ । યતસ્તેષાં પ્રત્યયાનાં નિયમેનાશેષત ઉપલબ્ધેરેવાપરિણામિત્વાત્ કૂટસ્થત્વસિદ્ધૌ નિશ્ચયહેતુમેવાશેષચિત્તપ્રચારોપલબ્ધિં સંશયહેતુમાત્થ । યદિ હિ તવ પરિણામિત્વં સ્યાતશેષસ્વવિષયચિત્તપ્રચારોપલબ્ધિર્ન સ્યાત્ ચિત્તસ્યેવ સ્વવિષયે યથા ચેન્દ્રિયાણાં સ્વવિષયેષુ । ન ચ તથાત્મનસ્તવ સ્વવિષયૈકદેશોપલબ્ધિઃ । અતઃ કૂટસ્થતૈવ તવેતિ ॥ ૭૫॥

તત્રાહ – ઉપલબ્ધિર્નામ ધાત્વ્વર્થો વિક્રિયૈવ ઉપલબ્ધુઃ કૂ૩અસ્થ્(આત્મ્) અતા ચેતિ વિરુદ્ધમ્ ॥ ૭૬॥

ન । ધાત્વર્થવિકૃયાયામુપલબ્ધ્યુપચારાત્ । યો હિ બૌદ્ધઃ પ્રત્યયઃ સ ધાત્વર્થો વિક્રિયાત્મક આત્મન ઉપલબ્ધિશબ્દેનોપચર્યતે । યથા છિદિક્રિયા દ્વૈધીભાવફલાવસાનેતિ ધાત્વર્થત્વેનોપચર્યતે તદ્વત્ ॥ ૭૭॥

ઇત્યુક્તઃ શિષ્ય આહ – નનુ ભગવન્ મમ કૂટસ્થત્વપ્રતિપાદનં પ્રત્યસમર્થો દૃષ્ટાન્તઃ । કથમ્ । છિદિઃ છેદ્યવિકૃયાવસાનોપચર્યતે યથા ધાત્વર્થત્વેન તથોપલબ્ધિશબ્દોપચરિતોઽપિ ધાત્વર્થો બૌદ્ધપ્રત્યય આત્મન ઉપલબ્દ્ઝિવિક્રિયાવસાનશ્ચેન્ નાત્મનઃ કૂટસ્થતાં પ્રતિપાદયિતું સમર્થઃ ॥ ૭૮॥

ગુરુરુવાચ – સત્યં  એવં સ્યાત્ યદ્યુપલબ્ધ્યુપલબ્ધ્રોર્વિશેષઃ । નિત્યોપલબ્ધિમાત્ર એવ હિ ઉપલબ્ધા । ન તુ તાર્કિકસમય ઇવાન્યોપલબ્ધિરન્ય ઉપલબ્ધા ચ ॥ ૭૯॥

નનૂપલબ્ધિફલાવસાનો ધાત્વર્થઃ કથમિતિ ॥ ૮૦॥

ઉચ્યતે – શ્રુ, ઉપલબ્ધ્યાભાસફલાવસાન ઇત્યુક્તં કિં ન શ્રુતં ત્વયા । ન ત્વાત્મનો વિક્રિયોત્પાદનાવસાન ઇતિ મયોક્તમ્ ॥ ૮૧॥

શિષ્ય આહ – કથં તર્હિ કૂટસ્થે મય્યશેષસ્વવિષયચિત્તપ્રચારોપલબ્ધૃત્વમિત્યાત્થ ॥ ૮૨॥

તં ગુરુરુવાચ – સત્યમેવાવોચં તેનૈવ કૂટસ્થતામબ્રુવં તવ ॥ ૮૩॥

યદ્યેવં ભગવન્ કૂટસ્થનિત્યોપલબ્ધિસ્વરૂપે મયિ શબ્દાદ્યાકારબૌદ્ધપ્રત્યયેષુ મત્સ્વરૂપોપલબ્ધ્યાભાસફલાવસાનવત્સૂત્પદ્યમાનેષુ કસ્ત્વપરાધો મમ ॥ ૮૪॥

સત્યં નાસ્ત્યપરાધઃ કિં ત્વવિદ્યામાત્રસ્તુ અપરાધ ઇતિ પ્રાગેવાવોચમ્ ॥ ૮૫॥

યદિ ભગવન્ સુષુપ્ત ઇવ મમ વિક્રિયા નાસ્તિ કથં સ્વપ્નજાગરિતે ॥ ૮૬॥

તં ગુરુરુવાચ – કિં ત્વનુભૂયેતે ત્વયા સ(ન્) તતમ્ ॥ ૮૭॥

બાઢમનુભવામિ કિં ત્વિવચ્છિદ્ય વિચ્છિદ્ય ન તુ સન્તતમ્ ॥ ૮૮॥

(તં) ગુરુરુવાચ – આગન્તુકે ત્વેતે ન તવાત્મભૂતે । યદિ તવાત્મભૂતે ચૈતન્યસ્વરૂપવત્ સ્વતઃસિદ્ધે સન્તતે એવ સ્યાતામ્ । કિં ચ સ્વપ્નજાગરિતે ન તવાત્મભૂતે વ્યભિચારિત્વાત્ વસ્ત્રાદિવત્ । ન હિ યસ્ય યત્ સ્વરૂપં તત્ તદ્વ્યભિચારિ દૃષ્ટમ્ । સ્વપ્નજાગરિતે તુ ચૈતન્યમાત્રત્વાદ્ વ્યભિચરતઃ । સુષુપ્તે ચેત્ સ્વરૂપં વ્યભિચરેત્ તન્ નષ્ટં નાસ્તીતિ વા બાધ્યમેવ સ્યાતાગન્તુકાનાં અતદ્ધર્માણામુભયાત્મકત્વદર્શનાત્ યથા ધનવસ્ત્રાદીનાં નાશો દૃષ્ટઃ સ્વપ્નભ્રાન્તિલબ્ધાનાં ત્વભાવો દૃષ્ટઃ ॥ ૮૯॥

નન્વેવં ભગવન્ ચૈતન્યસ્વરૂપમપ્યાગન્તુકં પ્રાપ્તં સ્વપ્નજાગરિતયોરિવ સુષુપ્તેઽનુપલબ્ધેઃ । અચૈતન્યસ્વરૂપો વા સ્યામહમ્ ॥ ૯૦॥

ન પશ્ય તદનુપપત્તેઃ । ચૈતન્યસ્વરૂપં ચેદાગન્તુકં પશ્યસિ પશ્ય । નૈતદ્ વર્ષશતેનાપ્યુપપત્ત્યા ઉપપત્ત્યા કલ્પયિતું શક્નુમો વયમન્યો વાચૈતન્યોઽપિ । (તસ્ય) સંહતત્વાત્ પારાર્થ્યમનેકત્વં નાશિતત્વં ચ ન કેનચિદુપપત્ત્યા વારયિતું શક્યમ્ । અસ્વાર્થસ્ય સ્વતઃસિદ્ધ્યભાવાદિત્યવોચામ । ચૈતન્યસ્વરૂપસ્ય ત્વાત્મનઃ સ્વતઃસિદ્ધેરન્યાનપેક્ષત્વં ન કેનચિદ્ વારયિતું શક્યમવ્યભિચારાત્ ॥ ૯૧॥

નનુ વ્યભિચારો દર્શિતો મયા સુષુપ્તે ન પશ્યામીતિ ॥ ૯૨॥

ન । વ્યાહતત્વાત્ । કથં વ્યાઘાતઃ । પશ્યતસ્તવ ન પશ્યામીતિ વ્યાહતં વચનમ્ । ન હિ કદાચિદ્ ભગવન્ સુષુપ્તે મયા ચૈતન્યમન્યદ્ વા કિંચિદ્ દૃષ્ટમ્ । પશ્યંસ્તર્હિ સુષુપ્તે ત્વમ્ । યસ્માદ્ દૃષ્ટમેવ પ્રતિષેધસિ ન દૃષ્ટિમ્ । યા તવ દૃષ્ટિસ્તચ્ ચૈતન્યમિતિ મયોક્તમ્ । યયા ત્વં વિદ્યમાનયા ન કિંચિદ્ દૃષ્ટમિતિ પ્રતિષેધસિ સા દૃષ્ટિસ્તચ્ ચૈતન્યમ્ । તર્હિ સર્વત્રાવ્યભિચારાત્ કૂટસ્થનિત્યત્વં સિદ્ધં સ્વત એવ ન પ્રમાણાપેક્ષમ્ । સ્વતઃસિદ્ધસ્ય હિ પ્રમાતુરન્યસ્ય પ્રમેયસ્ય પરિચ્છિત્તિં પ્રતિ પ્રમાણાપેક્ષા । યા ત્વન્યા નિત્યા પરિચ્છેદાય સા હિ નિત્યૈવ કૂટસ્થા સ્વયંજ્યોતિઃસ્વભાવા । આત્મનિ પ્રમાણત્વે પ્રમાતૃત્વે વા ન તાં પ્રતિ પ્રમાણાપેક્ષા તત્સ્વભાવત્વાત્ । યથા પ્રકાશનમુષ્ણત્વં વા લોહોદકાદિષુ પરતોઽપેક્ષ્યતેઽગ્ન્યાદિત્યાદિભ્યઃ અતત્સ્વભાવત્વાત્ નાગ્ન્યાદિત્યાદીનાં તદપેક્ષા સર્વદા તત્સ્વભાવત્વાત્ ॥ ૯૩॥

અનિત્યત્વ એવ પ્રમા સ્યાન્ ન નિત્યત્વ ઇતિ ચેત્ ॥ ૯૪॥

ન । અવગતેર્નિત્યત્વાનિત્યત્વયોર્વિશેષાનુપપત્તેઃ । ન હ્યવગતેઃ પ્રમાત્વેઽનિત્યાવગતિઃ પ્રમા ન નિત્યેતિ વિશેષોઽવગમ્યતે ॥ ૯૫॥

નિયાયાં પ્રમાતુરપેક્ષાભાવઃ । અનિત્યાયાં તુ યત્નાન્તરિતત્વાદવગતિરપેક્ષ્યત ઇતિ વિશેષઃ સ્યાદિતિ ચેત્ ॥ ૯૬॥

સિદ્ધા તર્હ્યાત્મનઃ પ્રમાતુઃ સ્વતઃસિદ્ધિઃ પ્રમાણનિરપેક્ષતયૈવેતિ ॥ ૯૭॥

અભાવેઽપ્યપેક્ષાભાવઃ નિત્યત્વાદિતિ ચેત્ । ન । અવગતેરેવાત્મનિ એવાત્મનિ સદ્ભાવાદિતિ પરિહૃતમેતત્ ॥ ૯૮॥

પ્રમાતુશ્ચેત્ પ્રમાણાપેક્ષાસિદ્ધિઃ કસ્ય પ્રમિત્સા સ્યાત્ । યસ્ય પ્રમિત્સા સ એવ પ્રમાતાભ્યુપગમ્યતે । તદીયા ચ પ્રમિત્સા પ્રમેયવિષયૈવ ન પ્રમાતૃવિષયા । પ્રમાતૃવિષયત્વેઽનવસ્થાપ્રસઙ્ગાત્ પ્રમાતુસ્તદિચ્છાયાશ્ચ તસ્યાપ્યન્યઃ પ્રમાતા તસ્યાપ્યન્ય ઇતિ । એવમેવેચ્છાયાઃ પ્રમાતૃવિષયત્વે । પ્રમાતુરાત્મનોઽવ્યવહિતત્વાચ્ ચ પ્રમેયત્વાનુપપત્તિઃ । લોકે હિ પ્રમેયં નામ પ્રમાતુરિચ્છાસ્મૃતિપ્રયત્નપ્રમાણજન્મવ્યવહિતં સિદ્ધ્યતિ નાન્યથાવગતિઃ પ્રમેયવિષયા દૃષ્ટા । ન ચ પ્રમાતુઃ પ્રમાતા સ્વસ્ય સ્વયમેવ કેનચિદ્ વ્યવહિતઃ કલ્પયિતું શક્ય ઇચ્છાદીનામન્યતમેનાપિ । સ્મૃતિશ્ચ સ્મર્તવ્યવિષયા ન સ્મર્તૃવિષયા । તથેચ્છાયા ઇષ્ટવિષયત્વમેવ નેચ્છાવદ્વિષયત્વમ્ । સ્મર્ત્રિચ્છાવદ્વિષયત્વેઽપિ હ્યુભયોરનવસ્થા

પૂર્વવદપ્રિહાર્યા સ્યાત્ ॥ ૯૯॥

નનુ પ્રમાતૃવિષયાવગત્યનુત્પત્તાવનવગત એવ પ્રમાતા સ્યાદિતિ ચેત્ ॥ ૧૦૦॥

ન અવગન્તુરવગતેરવગન્તવ્યવિષયત્વાત્ । અવગન્તૃવિષયત્વે ચાનવસ્થા પૂર્વવત્ સ્યાત્ । અવગતિશ્ચાત્મનિ કૂટસ્થનિત્યાત્મજ્યોતિરન્યતોઽનપેક્ષૈવ સિદ્ધા અગ્ન્યાદિત્યાદ્યુષ્ણપ્રકાશવદિતિ પૂર્વમેવ પ્રસાધિતમ્ । અવગતેશ્ચૈતન્યાત્મજ્યોતિષઃ સ્વાત્મન્યનિત્યત્વ આત્મનઃ સ્વાર્થતાનુપપત્તિઃ કાર્યકરણ(સંઘાત) વત્ સંહતત્વાત્ પારાર્થ્યં દોષવત્ત્વં ચાવોચામ । કથં । ચૈતન્યાત્મજ્યોતિષઃ સ્વાત્મન્યનિત્યત્વે સ્મૃત્યાદિવ્યવધાનાત્ સંહતત્વમ્ । તતશ્ચ તસ્ય ચૈતન્યજ્યોતિષઃ પ્રાગુત્પત્તેઃ પ્રધ્વંસાચ્ ચોર્ધ્વમાત્મન્યેવાભાવાત્ ચક્ષુરાદીનામિવ સંહતત્વાત્ પારાર્થ્યં સ્યાત્ । યદા ચ તદુત્પન્નમાત્મનિ વિદ્યતે ન તદાત્મનઃ સ્વાર્થત્વમ્ । તદ્ભાવાભાવાપેક્ષા હ્યાત્માનાત્મનોઃ સ્વાર્થત્વપરાર્થત્વસિદ્ધિઃ । તસ્માદાત્મનોઽન્યનિરપેક્ષમેવ નિત્યચૈતન્યજ્યોતિષ્ટ્વં સિદ્ધમ્ ॥ ૧૦૧॥

નન્વેવં સતિ અસતિ પ્રમાતૃત્વે કથં પ્રમાતુઃ પ્રમાતૃત્વમ્ ॥ ૧૦૨॥

ઉચ્યતે – પ્રમાયા નિત્યત્વેઽનિત્યત્વે ચ રૂપવિશેષાભાવાત્ । અવગતિર્હિ પ્રમા । તસ્યાઃ સ્મૃતીચ્છાદિપૂર્વિકાયા અનિત્યાયઃ કૂટસ્થનિત્યાયા વા ન (સ્વ) રૂપવિશેષો વિદ્યતે । યથા ધાત્વર્થસ્ય તિષ્ટત્યાદેઃ ફલસ્ય ગત્યાદિપૂર્વકસ્યાનિત્યસ્યાપૂર્વસ્ય નિત્યસ્ય વા રૂપવિશેષો નાસ્તીતિ તુલ્યો વ્યપદેશો દૃષ્ટઃ – તિષ્ટન્તિ મનુષ્યાઃ તિષ્ટન્તિ પર્વતા ઇત્યાદિ । તથા નિત્યાવગતિસ્વરૂપેઽપિ પ્રમાતરિ પ્રમાતૃત્વવ્યપદેશો ન વિરુધ્યતે ફલસામાન્યાદિતિ ॥ ૧૦૩॥

અત્રાહ શિષ્યઃ – નિત્યાવગતિસ્વરૂઅસ્યાત્મનોઽવિક્રિયત્વાત્ કાર્યકરણૈરસંહત્ય તક્ષાદીનામિવ વાસ્યાદિભિઃ કર્તૃત્વં નોપપદ્યતે, અસંહતસ્વભાવસ્ય ચ કાર્યકરણોપાદાનેઽનવસ્થા પ્રસજ્યેત । તક્ષાદીનાં તુ કાર્યકરણૈર્નિત્યમેવ સંહતત્વમિતિ વાસ્યાદ્યુપાદાને નાનવસ્થા સ્યાદિતિ ॥ ૧૦૪॥

ઇહ ત્વસંહતસ્વભાવસ્ય કરણાનુપાદાને કર્તૃત્વં નોપપદ્યત ઇતિ કરણમુપાદેયમ્, તદુપાદાનમપિ વિક્રિયૈવેતિ તત્કર્તૃત્વે કરણાન્તરમુપાદેયમ્, તદુપાદાનેઽપ્યન્યદિતિ પ્રમાતુઃ સ્વાતન્ત્ર્યેઽનવસ્થાપરિહાર્યા સ્યાત્ । ન ચ ક્રિયૈવાત્માનં કારયતિ, અનિર્વર્તિતાયાઃ સ્વરૂપાભાવાત્ । અથાન્યદાત્માનમુપેત્ય ક્રિયાં કારયતીતિ ચેત્ । ન । અન્યસ્ય સ્વતઃસિદ્ધત્વાવિષયત્વાદ્યનુપપત્તેઃ । ન

હ્યાત્મનોઽન્યદચેતનં વસ્તુ સ્વપ્રમાણકં દૃષ્ટમ્ ।
શબ્દાદિસર્વમેવાવગતિફલાવસાનપ્રત્યયપ્રમિતં સિદ્ધં સ્યાત્ ।
અવગતિશ્ચેદાત્મનોઽન્યસ્ય સ્યાત્ સોઽપ્યાત્મૈવાસંહતઃ સ્વાર્થઃ સ્યાન્ ન પરાર્થઃ
ન ચ દેહેન્દ્રિયવિષયાણાં સ્વાર્થઃ સ્યાન્ ન પરાર્થઃ । ન ચ
દેહેન્દ્રિયવિષયાણાં સ્વાર્થતામવગન્તું
શક્નુમોઽવગત્યવસાનપ્રત્યયાપેક્ષસિદ્ધિદર્શનાત્ ॥ ૧૦૫॥

નનુ દેહસ્યાવગતૌ ન કશ્ચિત્ પ્રત્યક્ષાદિપ્રત્યયાન્તરમપેક્ષતે ॥ ૧૦૬॥

બાઢં જાગ્રત્યેવં સ્યાત્ । મૃતિસુષુપ્ત્યોસ્તુ દેહસ્યાપિ
પ્રત્યક્ષાદિપ્રમાણાપેક્ષયૈવ સિદ્ધિઃ । તથૈવેન્દ્રિયાણામ્ । બાહ્યા એવ હિ
શબ્દાદયો દેહેન્દ્રિયાકારપરિણતા ઇતિ પ્રત્યક્ષાદિપ્રમાણાપેક્ષયૈવ (હિ)
સિદ્ધિઃ । સિદ્ધિરિતિ ચ પ્રમાણફલમવગતિમવોચામ સા ચાવગતિઃ કૂટસ્થા
સ્વયંસિદ્ધાત્મજ્યોતિઃસ્વરૂપેતિ ચ ॥ ૧૦૭॥

અત્રાહ ચોદકઃ – અવગતિઃ પ્રમાણાનાં ફલં કૂટસ્થનિત્યાત્મજ્યોતિસ્વરૂપેતિ ચ
વિપ્રતિષિદ્ધમ્ । ઇત્યુક્તવન્તમાહ – ન વિપ્રતિષિદ્ધમ્ । કથં તર્હિ ।
કૂટસ્થનિત્યાપિ સતી પ્રત્યક્ષાદિપ્રત્યયાન્તે લક્ષ્યતે તાદર્થ્યાત્ ।
પ્રત્યક્ષાદિપ્રત્યયસ્યાનિત્યત્વેઽનિત્યેવ ભવ્તિ । તેન પ્રમાણાનાં
ફલમિત્યુપચર્યતે ॥ ૧૦૮॥

યદ્ય્ એવં ભગવન્ કૂટસ્થનિત્યાવગતિરાત્મજ્યોતિઃસ્વરૂપૈવ સ્વયંસિદ્ધા, આત્મનિ
પ્રમાણનિરપેક્ષત્વાત્ તતોઽન્યદચેતનં સંહત્યકારિત્વાત્ પરાર્થમ્ । યેન ચ
સુખ્હદુઃખમોહપ્રત્યયાવગતિરૂપેણ પારાર્થ્યં તેનૈવ
સ્વરૂપેણાનાત્મનોઽસ્તિત્વં નાન્યેન રૂપાન્તરેણ અતો નાસ્તિત્વમેવ પરમાર્થતઃ ।
યથા હિ લોકે રજ્જુસર્પમરીચ્યુદકાદીનાં તદવગતિવ્યતિરેકેણાભાવો યુક્તઃ ।
એવમેવ ભગવનવગતેરાત્મજ્યોતિષો નૈરન્તર્યભાવાત્ કૂટસ્થનિત્યતા
અદ્વૈતભાવશ્ચ સર્વપ્રત્યયભેદેષ્વવ્યભિચારાત્ । પ્રત્યયભેદાસ્ત્વવગતિં
વ્યભિચરન્તિ । યથા સ્વપ્ને નીલપીતાદ્યાકારભેદરૂપાઃ પ્રત્યયાસ્ત્વવગતિં
વ્યભિચરન્તિ । યથા સ્વપ્ને નીલપીતાદ્યાકારભેદરૂપાઃ પ્રત્યયાસ્તદવગતિં
વ્યભિચરન્તઃ પરમાર્થતો ન સન્તીત્યુચ્યન્તે, એવં જાગ્રત્યપિ
નીલપીતાદિપ્રત્યયભેદાસ્તામેવાવગતિં વ્યભિચરન્તોઽસત્યરૂપા ભવિતૂમર્હન્તિ ।
તસ્યાશ્ચાવગતેરન્યોઽવગન્તા નાસ્તીતિ ન સ્વેન સ્વરૂપેણ  સ્વયમુપાદાતું હાતું
વા શક્યતે, અન્યસ્ય ચાભાવાત્ ॥ ૧૦૯॥

તથૈવેતિ । એષાવિદ્યા યન્નિમિત્તઃ સંસારો જાગ્રત્સ્વપ્નલક્ષણઃ । તસ્યા અવિદ્યાયા વિદ્યા નિવર્તિકા । ઇત્યેવં ત્વમભયં પ્રાપ્તોઽસિ । નાન્તઃપરં જાગ્રત્સ્વપ્નદુઃખમનુભવિષ્યસિ સંસારદુઃખાન્ મુક્તોઽસીતિ ॥ ૧૧૦॥

ઓમિતિ ॥ ૧૧૧॥

ઇતિ અવગતિપ્રકરણમ્ ॥ ૨ ॥

મુમુક્ષૂણામુપાત્તપુણ્યાપુણ્યક્ષપણપરાણામપુર્વાનુપચયાર્તિનાં પરિસંખ્યાનમિદમુચ્યતે । અવિદ્યાહેતવો દોષા વાગ્મનઃકાયપ્રવૃત્તિહેતવ્યઃ પ્રવૃત્તેશ્ચેષ્ટાનિષ્ટમિશ્રફલાનિ કર્માણ્યુપચીયન્ત ઇતિ તન્મોક્ષાર્થમ્ ॥

૧૧૨॥

તત્ર શબ્દસ્પર્શરૂપરસગન્ધાનાં વિષયાણાં શ્રોતાદિગ્રાહ્યત્વાત્ સ્વાટ્મનિ પરેષુ વા વિજ્ઞાનાભાવઃ તેષામેવ પરિણતાનાં યથા લોષ્ટાદીનામ્ । શ્રોત્રાદિદ્વારૈશ્ચ જ્ઞાયન્તે । યેન ચ જ્ઞાયન્તે સ જ્ઞાતૃત્વાદતજ્જાતીયઃ । તે હિ શબ્દાદયોઽન્યોન્યસંસર્ગિત્વાજ્ જન્મવૃદ્ધિ(વિ) પરિણામાપક્ષયનાશસંયોગવિયોગાવિર્ભાવતિરોભાવવિકારવિકારિક્ષેત્રબીજાદ્યનેક્ અધર્માણઃ સામાન્યેન ચ સુખદુઃખાદ્યનેકધર્માણઃ । તદ્વિજ્ઞાતૃત્વાદેવ તદ્વિજ્ઞાતા સર્વશબ્દાદિધર્મવિલક્ષણઃ ॥ ૧૧૩॥

તત્ર શબ્દાદિભિરુપલભ્યમાનૈઃ પીદ્યમાનો વિદ્વાનેવં પરિસંચક્ષીત ॥ ૧૧૪॥

શબ્દસ્તુ ધ્વનિસામાન્યમાત્રેણ વિશેષધર્મૈર્વા ષડ્જાદિભિઃ પ્રિયૈઃ, સ્તુત્યાદિભિરિષ્ટૈઃ, અનિષ્ટૈશ્ચાસત્યબીભત્સપરિભવાક્રોશાદિભિર્વચનૈઃ માં દૃક્સ્વભાવમસંસર્ગિણમવિક્રિયમચલમનિધનમભયમત્યન્તસૂક્ષ્મમવિષય ં ગોચરીકૃત્ય સ્પ્રષ્ટું નૈવાર્હત્યસંસર્ગિત્વાદેવ મમ । અત એવ ન શબ્દનિમિત્તા હાનિર્વૃદ્ધિર્વા । અતો માં કિં કરિષ્યતિ સ્તુતિનિન્દાદિપ્રિયાપ્રિયત્વાદિલક્ષણઃ શબ્દઃ । અવિવેકિનં હિ શબ્દમાત્મત્વેન ગતં પ્રિયઃ શબ્દો વર્ધયેદપ્રિયશ્ચ ક્ષપયેતવિવેકિત્વાત્ ન તુ મમ વિવેકિનો વાલાગ્રમાત્રમપિ કર્તુમુત્સહત ઇતિ । એવમેવ સ્પર્શસામાન્યેન તદ્વિશેષૈશ્ચ શિતોષ્ણમૃદુકર્કશાદિજ્વરોદરશૂલાદિલક્ષણૈશ્ચાપ્રિયૈઃ પ્રિયૈશ્ચ કૈશ્ચિચ્છરીરસમવાયિભિર્બાહ્યાગન્તુકનિમિત્તૈશ્ચ ન મમ કાચિદ્ વિક્રિયા વૃદ્ધિહાનિલક્ષણા અસ્પર્શત્વાત્ ક્રિયતે વ્યોમ્ન ઇવ મુષ્ટિઘાતાદિભિઃ । તથા રૂપસામાન્યેન તદ્વિશેષૈશ્ચ પ્રિયાપ્રિયૈઃ સ્ત્રીવ્યઞ્જનાદિલક્ષણૈઃ અરૂપત્વાન્ ન મમ કાચિદ્ ધાનિર્વૃદ્ધિર્વા ક્રિયતે । તથા રસસામાન્યેન તદ્વિશેષૈશ્ચ

(પ્રિયાપ્રિયૈઃ) મધુરામ્લલવણકટુતિક્તકષાયૈર્મૂઢબુદ્ધિભિઃ પરિગૃહીતૈઃ
અરસાત્મકસ્ય ન મમ કાચિદ્ ધાનિર્વૃદ્ધિર્વા ક્રિયતે । તથા ગન્ધસામાન્યેન
તદ્વિશેષૈઃ પ્રિયાપ્રિયૈઃ પુષ્પાદ્યનુલેપનાદિલક્ષણૈઃ અગન્ધાત્મકસ્ય ન મમ
કાચિદ્ ધાનિર્વૃદ્ધિર્વા ક્રિયતે । ૦ક઼્ અશબ્દમસ્પર્શમરૂપમવ્યયં તથારસં
નિત્યમગન્ધવચ્ ચ યત્ૃક઼્ ઇતિ શ્રુતેઃ ॥ ૧૧૫॥

કિં ચ ય એવ બાહ્યઃ શબ્દાદયસ્તે શરીરાકારેણ સંસ્થિતાઃ તદ્ગ્રાહકૈશ્ચ
શ્રોત્રાદ્યાકારૈરન્તઃકરણદ્વયતદ્વિષયાકારેણ ચ, અન્યોન્યસંસર્ગિત્વાત્
સંહતત્વાચ્ ચ સર્વક્રિયાસુ । તત્રૈવં સતિ વિદુષો મમ ન કશ્ચિચ્
છત્રુર્મિત્રમુદાસીનો વાસ્તિ । તત્ર યદિ (કશ્ચિન્) મિથ્યાજ્ઞાનાભિમાનેન
પ્રિયમપ્રિયં વા પ્રયુયુક્ષેત ક્રિયાફલલક્ષણમ્, તન્ મૃષૈવ
પ્રયુયુક્ષતિ સઃ । તસ્યાવિષયત્વાન્ મમ – ૦ક઼્ અવ્યક્તોઽયમચિન્ત્યોઽયંૃક઼્
ઇતિ સ્મૃતેઃ । તથા (સર્વેષાં) પઞ્ચાનામપિ ભૂતાનામવિકાર્યઃ અવિષયત્વાત્ ।
૦ક઼્ અચ્છેદ્યોઽયમદાહ્યોઽયંૃક઼્ ઇતિ સ્મૃતેઃ । યાપિ
શરીરેન્દ્રિયસંસ્થાનમાત્રમુપલક્ષ્ય મદ્ભક્તાનાં વિપરીતાનાં ચ
પ્રિયાપ્રિયાદિપ્રયુયુક્ષા તજ્જા ચ ધર્માધર્માદિપ્રાપ્તિઃ સા તેષામેવ ન તુ
મય્યજરેઽમૃતેઽભયે ૦ક઼્ નૈનં કૃતાકૃતે તપતઃૃક઼્ ૦ક઼્ ન કર્મણા
વર્ધતે નો કનીયાન્ૃક઼્ ૦ક઼્ સબાહ્યાભ્યન્તરો હ્યજઃૃક઼્ ૦ક઼્ ન લિપ્યતે
લોકદુઃખેન બાહ્યઃૃક઼્ ઇત્યાદિશ્રુતિસ્મૃતિભ્યઃ । અનાત્મવસ્તુનશ્ચાસત્ત્વાદિતિ
પરમો હેતુઃ । આત્મનશ્ચાદ્વયત્વવિષયાણિ દ્વયસ્યાસત્ત્વાત્ યાનિ
સર્વાણ્યુપનિષદ્વાક્યાનિ વિસ્તરશઃ સમીક્ષિતવ્યાનિ સમીક્ષિતવ્યાનીતિ ॥ ૧૧૬॥

ઇતિ પરિસંખ્યાનપ્રકરણમ્ ॥ ૩ ॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યશ્રીગોવિન્દભગવત્પાદપૂજ્યશિષ્યસ્ય
શ્રીશંકરભગવતઃ કૃતિઃ સકલવેદોપનિષત્સારોપદેશસાહસ્રી સમાપ્તા

॥ ૐ તત્સત્ ॥

Encoded by David J. Dargie and Michelle M. Styles-Dargie
dargie at cltr.uq.edu.au

*upadeshasAhasrI*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*